781

781

Incomplete

C

Saṁskārakaustubha : Title

Anantadeva : Author

: Editor

: Year, Vols.

: Publisher

781 : : Remarks

सं० र० १

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीकृष्णंधुंडिराजंचप्रणम्याशौचनिर्णयः॥क्रियतेजीवदेवेनयथा
मतिसमासतः १ जीर्णान्नवीनानाशौचग्रंथानालोच्यसर्वशः॥ संग्रहोयंचकृतः सद्भिर्द्रष्टव्योयंप्रयत्न
तः॥आशौचंद्विविधं॥कर्मानधिकारलक्षणमस्पृश्यत्वलक्षणंचेति।तदपिप्रत्येकंद्विविधं।सूतकंमृ
तकंच।तत्राद्यंपुत्रसवः सूतिकायाःदशाहोर्ध्वंसत्यपिस्पृश्यत्वेविंशतिरात्रपर्यंतंकर्मानधिकारलक्षणं
सपिंडानांदशाहमध्येपि॥द्वितीयंतुपुत्रजन्मनिपितुरास्नानंअस्पृश्यतालक्षणं।मृतकमपिदशाहा
दित्रिभागेनअस्थिसंचयनादूर्ध्वंस्पृश्यत्वेसत्यपिकर्मानधिकारलक्षणंदशाहादि।द्वितीयंतुपि
त्राद्यौर्ध्वदेहिकंकुर्वतोब्रह्मचारिणः।कर्माधिकारेसत्यप्यस्पृश्यत्वमात्रं।एवमन्यत्राप्यूह्यं।समुच्चितंतु
सूतकंदशाहमध्येसूतिकायाः।मृतकमपिताद्दशं अस्थिसंचयनात्पूर्वं।कलौचदशाहादिपर्यं
तं।अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवचेतिकलिवर्ज्येषुपाठात्॥तत्रसूतकंतावदुच्यते॥आद्य

मासत्रयेगर्भस्रावेमातुस्त्रिरात्रंसपिंडानांसद्यःशुद्धिः॥सद्यःपदात्स्नानाभावइतिकेचित्।स्नात
रित्यन्येचतुर्थादिमासत्रयेचातुर्माससमसंख्यं।सपिंडानांचतुर्थेसद्यःशुद्धिः।पंचमषष्ठयोस्त्रिरात्रं
चतुर्वर्णसाधारणं।मदनपारिजातस्तुआचतुर्थमासंपितुरेवस्नानं।नान्यसपिंडानां।पंचमषष्ठयोस्त्रि
त्रंनिर्गुणसपिंडपरं।गुणवतामेकाह इत्याह।अत्रसर्वपितुरेवास्पृश्यत्वमन्येषांकर्मानधिकारमात्रं।स
मादिमातुः सपिंडानांचदशाहंब्राह्मणस्य।क्षत्रियस्यद्वादशाहं।वैश्यस्यपंचदशाहं।शूद्रस्यमासं
न्यायवर्तिनस्त्वर्द्धं॥माधवस्तुसप्तमाष्टमयोरपिसूतिकातिरिक्तानांमाससमसंख्यंनवमप्रभृ
दशाहादीत्याह।क्षत्रियादिष्वपिमाचतुर्दशाहादेवास्पृश्यत्वनिवृत्तिः।पितुःस्नानात्।कन्योत्पन्ने
स्नानमितिकेचित्।भवतीत्यन्ये।सपत्नमातुरपिप्राक्स्नानादस्पृश्यत्वमितिकेचित्।सपिंडानां
मस्पृश्यत्वंसर्वदानास्त्येव।किंतुकर्मानधिकारमात्रं।सप्तमपुरुषपर्यंतंसपिंडाः।ततः सप्तसा

सं·कौ· दकाः। ततः सप्तसगोत्राः। सोदकानां त्रिरात्रं। सगोत्राणां स्नानं। प्रयोगपारिजाते तु पुंप्रसवे सपिंडानां द
शाहादि। स्त्र्यपत्ये तु सोदकवत्सपिंडानामपि त्र्यहमित्याह॥ सोदकादीनामपि कर्मानधिकारमात्रं। सूति
२ कायाः स्वस्ववर्णाशौचानंतरं पुत्रसूतौ विंशतिरात्रं कन्याप्रसूतौ मासं कर्मानधिकारः। पितुः प्रथमष
ष्ठमादिदिनेषु दानादौ वचनादधिकारः। अथ मृताशौचं॥ मृतजाते बाले जाते नालच्छेदादूर्ध्वं मृते वा सर्वे
षां सद्यः शुद्धिः। जननाशौचं तु संपूर्णमस्त्येव। जाते नालच्छेदात्पूर्वं मृते मरणनिमित्ता सद्यः शुद्धिः। ज
ननाशौचं तु मातुः संपूर्णं सपिंडानां त्रिरात्रं। दशाहमध्ये मृतशिशोः खननमेव। नोदकदानादि। अलं
करणं तु सर्वत्र भवति। दशाहोर्ध्वं सपिंडानां नामानाम्नोः सद्यः शुद्धिः। खननमेव। नामशब्दो नकालोप
लक्षणार्थः। किंतु स्वार्थपर इत्युक्तं निर्णयसिंधौ। नामोत्तरं दंतोत्पत्तेः प्राग्दाहखननयोर्विकल्पः। दा २
हे एकाहमाशौचमुदकादि च। खनने सद्यः शुद्धिर्नोदकादि। जातदंतस्य वर्षत्रयात्पूर्वमकृतचूडस्य

दाहखननयोर्विकल्पः॥ पक्षद्वयेप्येकाहं शौचं। दाहे त्र्यहः खनने एकाह इति माधवः॥ स्मृत्यर्थसारे च। सदंत
जातमृतस्य तु न दाहैकाहादि। दन्ताहमध्ये मा शौचाशौचनिषेधात्॥ वर्षत्रयमध्ये कृतचूडस्य तु दाहादि त्रिरात्रं
च नित्यं। वर्षत्रयोर्ध्वमाव्रतादेशाद्दाहादि त्रिरात्रं च नित्यमेव॥ आव्रतादेशाद्दाहोदकदानादि तूष्णीमेव। कृतचू
डस्य पिंडदानमपि भूमौ तूष्णीमेव॥ सपिंडीकरणवर्ज्यं षोडश श्राद्धानीति केचित्। त्रिराद्ये दिने त्रयः पिंडाः॥
द्वितीये चत्वारः अस्थिसंचयनं च। तृतीये त्रयः पिंडाः वासःक्षालनं चेति। सर्वं त्रिरात्रे चैवमूह्यं। अनुगमनं त
न्द्यब्दस्य कृताकृतं। अन्यस्यानित्यं। पित्रोस्तु दशाहोर्ध्वं यावदुपनयं त्रिरात्रमेव। दशाहमध्येपीति केचित्॥
ऊनद्व्यब्दे दशाहपक्षो मिताक्षरोक्तः। स्मृत्यर्थसारे निराकृतः। एतत्सपिंडाशौचमुक्तं पुरुषमृतौ। कन्यामृतौ
वाऽचूडाकालात्सद्यः शुद्धिः। तदूर्ध्वमवाग्दानात् एकाहं। तदूर्ध्वमाविवाहात्पतिपितृगोत्रयोस्त्रिरात्रं।
अप्रत्तस्त्रीणां त्रिपुरुषमेव सापिंड्यं। साप्तपौरुषमिति गौडाः। पित्रोस्तु पूर्ववत्। केचित्तु पित्रोरप्यजात

सं.कौ दंतासु कन्यास्वेकाहं ततस्त्र्यहमित्याहुः। अत्रोनद्विवर्षे खननं परस्ताद्दहनं पुरुषवदिति स्मृत्यर्थसारे। अप्रत्तायाः
३ पितृवेश्मनि त्र्यहं तु मत्याः मरणाये यावज्जीवमाशौचमिति वाचस्पतिमिश्राः। उदकपिंडदानेत्वाविवाहं विकल्पः। शू-
द्रेप्येवं। स्त्रीसधर्मत्वात्। इदं च वयोवस्थाशौचं सर्ववर्णसाधारणं॥ सूतकं च मृतकं च वयोवस्थाशौचं सपिंडग्र-
हणान्न सोदकादीनामित्याहुः। उपनयनोर्ध्वं मृतस्य पुरुषस्य दशाहादि जात्याशौचं सूतकेवत्सर्वेषाम् एवं सोदका-
दीनां त्रिरात्रादि च। इदं चास्पृश्यत्वलक्षणमपि। दशाहादित्रिभागेनास्थिसंचयनोत्तरं स्पृश्यत्वं कलौ वर्ज्यं॥
पितृमात्राचार्यपत्नी नामहागुरूणां निपाते द्वादशरात्रं। विवाहादूर्ध्वं स्त्रीमरणे भर्तृपक्षे जात्याशौचं न पितृप-
क्षे तद्गृहे प्रसवमरणयोरेकाहः त्र्यहे पित्रोः। माधवस्तूभयत्र त्र्यहं पित्रोरेकाहो भ्रात्रादिबंधुवर्गस्येत्याह॥
भ्रातुः प्रसवे एकाहः। मृतौ त्र्यहं इति केचित् पक्षिणीत्यन्ये। भ्रातृभिन्नानामेकाहः पतिगृहे प्रसवे तु पि- ३
त्रादीनां शौचं। तद्गृहमरणे पित्रोस्त्रिरात्रं भ्रातुः पक्षिणी। माधवस्त्वन्यत्र कन्यामृतौ पित्रोः पक्षिणी

त्याह। ग्रामांतरे इत्यामिति स्मृत्यर्थसारे। पित्रोर्मृतौ दुहितॄणां दशाहमध्ये त्रिरात्रं। ऊर्ध्वं तु पक्षिणी। भ्रातुर्भगिनी
गृहे तस्यास्तद्गृहे मृतौ त्रिरात्रं। अन्यत्र पक्षिणी। पक्षिणीपदार्थमाह हरदत्तः। दिवामरणे तदहः अंतरा रात्रिः पर-
द्युश्च। रात्रौ मरणे सा रात्रिः परेद्युरहो रात्रिश्चेति। क्षीरस्वामिरपि। पक्षाविव पक्षौ पूर्वोत्तरदिवसौ यस्येति तन्म-
ध्यवर्तिनी रात्रिः पक्षिणी। निशाद्वयमध्यगो दिवसो दिवसोप्येवमिति। शूद्रस्यापि विवाहोर्ध्वं जात्याशौचं। स्त्री-
शूद्रयोरुपनयनस्थानीयत्वाद्विवाहस्य। विवाहाभावेपि षोडशवर्षोत्तरं जात्याशौचमिति केचित्। अष्टवर्षा-
दूर्ध्वमित्यन्ये। अनुलोमानामाशौचं कलौ नोपयुक्तं प्रतिलोमानां नाशौचं मालापकर्षणार्थं स्नानमिति
मिताक्षरायां। माधवस्तु शूद्रवदाशौचमाह। औरसपुत्रस्य पितृमातृमरणे देशकालविशेषेण जात्याशौचं
दत्तकादीनां त्रिरात्रं। दत्तक्रीतादिमृतौ च पूर्वापरपित्रोस्त्रिरात्रं। सवर्णगस्त्रीमृतौ प्रसवे च पूर्वापरभर्त्रोः।
उभयत्र सपिंडानामेकाहः। दत्तकादीनां सवर्णगस्त्रीणां चासंनिधिमृतौ पितृभर्त्रोरेकाहः। सपिंडानां

स्नानं। हीनवर्णगानांत्वाशौचाभावः। दत्तकस्यपुत्रपौत्राणांजननेमरणेवासपिंडानामेकाहः। सपिंडनुपुत्री
कृतेदशाहएव। एकस्यांपूर्वापरभर्तुरुत्पन्नयोः भ्रात्रोः प्रसवएकाहः। मरणेत्रिरात्रं। दौहित्रभागिनेययोरुप
नीतयोस्त्रिरात्रं। अनुपनीतयोः पक्षिणी। मातुलेमातुलान्यांसन्निधौपक्षिणी। असन्निधावेकाहः। आ
चार्येत्रिरात्रं। तत्पुत्रपत्न्योरेकाहः। श्रोत्रियेस्वगृहेत्रिरात्रं। एकग्रामीणेत्वेकाहः। ऋत्विक्षुबद्धकालया
जकेषुत्रिरात्रं॥ अल्पकालयाजकेत्वेकाहः। शिष्येस्वोपनीतेत्र्यहः। परोपनीतेपक्षिणी। आत्मपितृष्व
स्रमातृष्वस्रमातुलपुत्राः आत्मबांधवाः। पितुः पितृष्वस्रमातृष्वस्रमातुलपुत्राः पितृबांधवाः। मातुःपि
तृष्वस्रमातृष्वस्रमातुलपुत्राः मातृबांधवाः। अत्रबंधुत्रयेपक्षिणी। पितृष्वस्रादिकन्यायोनामूढा
नांत्वेकाहः। श्वश्रूश्वसुरयोः सन्निधौत्रिरात्रं। असन्निधौपक्षिणी। देशांतरेएकरात्रं। जामातृमित्रशा
लकतत्सुतानांस्नानं। शालकेत्वेकाह इतिकेचित्। मातामहयाज्ययोस्त्रिरात्रं। ग्रामांतरेपक्षिणी॥

मातामह्यांपितृष्वसस्त्रिपक्षिणी॥ एषुविषयेषुपक्षिण्येकाहादिगुरुलघुकल्पाः स्मृत्यंतरोक्ताः। एवमे
वसंनिधिविदेशादिभिर्व्यवस्थाप्याः। सर्वत्रमूल्याभावेक्रियाकर्तुरसगोत्रस्यापिदशाहः। स्वसपिंडे
षुवानप्रस्थयतिषंढेषुमृतेषुस्नानं। योऽविकृतविप्रगृह्येप्रदिनंयुद्धमूर्धनिमृतस्तस्यस्नानंयुद्धहतकालां
तरमृतस्यैकाहः। आसप्ताहात्त्रिरात्रमूर्ध्वंदशरात्रमितिकेचित्। असन्निधौस्नानमितिमाधवः। युद्धहत
स्यश्राद्धादिनिषेधइतिकेचित्। अन्येदशापिंडनिषेधमाकूर्यंतिवत्। दिवाशवस्पर्शेनक्षत्रदर्शनाच्छुद्धिः
रात्रौचेत्सूर्यदर्शनात् शवस्पृशस्तदन्नाशनेतद्गृहवासेयावत्तेषामाशौचंतावदाशौचं एवंयस्यसं
सर्गादाशौचंपततितेनतस्यकर्माणाधिकारः॥ किंतुस्पृश्यत्वमात्रं। तद्गृहपाषाणांबद्व्यापंमदीनांनाशौ
चसंबंधः। शवनिर्हरणेतूच्यते। गृहवासेन्नभक्षणेचैकाहः। भृतिग्रहेणनिर्हारेतदन्नाशनेतद्गृ
हवासेचदशाहः तदन्नाशनेतद्गृहवासेत्र्यहः स्नेहेनसवर्णनिर्हारेदाहेचतज्जात्याशौचं। विजाती

सं·कौ· यन्निर्हारे शवजातीयमाशौचं। अत्रभृतिग्रहे द्विगुणं। आपद्येकगुणं। सोदकनिर्हारे दशाहइतिमाधवः। अ
५ सपिंडालंकरणेजानतःकृतेकृच्छ्रपादः। अज्ञानादुपवासः। अशक्तौस्नानं धर्मार्थमनाथसवर्णहरणेक्रिया
करणेचद्विजस्यानंतफलं स्नानंप्राणायामोग्निसंस्पर्शश्चेतिमाधवीये। अग्निदप्येवं। मातुलत्वादिसं
बंधेत्रिरात्रं। अनुगमनेतुसपिंडेनदोषः। असपिंडेतु। समोत्कृष्टवर्णानुयाने स्नात्वाग्निंस्पृष्ट्वासर्पिः
प्राश्यपुनःस्नात्वाप्राणायामैःशुद्धिः। हीनवर्णेतुक्षत्रियेहः। वैश्येपक्षिणी। शूद्रेत्रिरात्रं क्षत्रस्यवैश्येहः।
शूद्रेपक्षिणी। वैश्यस्यशूद्रेहः। माधवस्तुविप्रस्यवैश्येत्र्यहः। क्षत्रस्यशूद्रेप्येवंशेषंप्राग्वत्। स्नानाग्नि
स्पर्शनघृतप्राशनानिसर्वत्रेत्याह। परेषांसवर्णानामौर्ध्वदैहिककरणेकृच्छ्रत्रयाच्छुचिः। हीनौर्ध्वदै
हिककरणेतुद्वैगुण्यंचातुर्गुण्यंवाधूह्यं। रोदनेतुसगोत्रसवर्णयोः संचयनात्पूर्वं सचैलस्नानं। ऊर्ध्व ५
माचमनं हीनवर्णेषुसंचयनात्प्राक्सचैलं। ऊर्ध्वंस्नानमात्रं। रोदनमात्रएकाहइत्युक्तंमिताक्षरायां॥

अथान्नोच्यन्नभक्षणे। मत्यासकृद्भक्षणेयस्मिन्दिनेभुक्तं ततः यावत्तेषामाशौचं तावदाशौचं कृत्वांतेप्रायश्चित्तं
कुर्यात्। तत्रसवर्णाशौचेत्रिरघमर्षणंगायत्र्यष्टसहस्रंच॥ क्षत्रियाशौचेउपवासश्च। वैश्याशौचेत्रिरात्रोपवा
सश्च शूद्राशौचेकृच्छ्रः। क्षत्रवैश्ययोः पंचाशतमष्टशतंगायत्रीजपउत्तमेषु। शूद्रस्यसर्वत्रस्नानं। इदमापदि।
अमत्यासकृद्भक्षणेविप्रस्यवर्णक्रमेणैकाहत्र्यहपंचाहसप्ताहोपवासाः। दशविंशतिःषष्टिःशतंचप्राणाया
माः। पंचगव्याशनंच। अभ्यासेद्विगुणं। आपदितुप्राणायामशतं। पंचशतं अष्टसहस्रंगायत्रीजपश्च मत्या
नापदिविप्रस्यवर्णेषुसांतपनकृच्छ्रमहासांतपनचांद्राणि। अभ्यासेमासिकद्वैमासिकत्रैमासिकषाण्मा
सिकानीत्यादिमाधवीयादौज्ञेयं॥ अथदासाशौचं॥ तत्रदासःपंचदशविधः। गृहजातक्रीतलब्धदायोपा
गतान्नाकालभृतस्वामिप्राप्तिसंकटमोक्षितमहद्दणमोचितयुद्धप्राप्तपणजिततवाहमित्युपगतप्रव्र
ज्यावसितभक्तदासवडवाहृतात्मविक्रेतारइति। वडवादासी। तयाहृतः तत्रदौगर्भदासभक्तदासयोः

सं॰कौ॰ स्वसपिंडमृतौमासं स्वकर्मानधिकारः॥ स्वामिकार्येतु गर्भदासस्य स्नानमात्रेणास्पृश्यता। भक्तदासस्यत्र्य
६ होर्ध्वं एवंदास्यामपि सूतिकायास्तस्याः अस्पृश्यत्वमपि मासमात्रं। अन्येषां दत्तदासादीनां स्वसपिंडमृ
तौ स्वाम्याशौचसमसंख्यदिनोर्ध्वं स्वामिकार्ये स्पृश्यता स्वकर्मानधिकारस्तु मासमेव। दास्याः पूर्ववत्।
स्वामितत्सपिंडमृतौ तु दासानां स्वामितुल्यमाशौचं। इदंचानुलोम्येन दासानां। प्रतिलोम्येन दासत्वंगता
नां त्वाशौचाभावः। तादृशदासत्वस्यानिषिद्धत्वात्॥ अथ रात्रौ जननमरणयोः रात्रिं त्रिभागं कृत्वाद्य
भागद्वये चेत्पूर्वदिनं अंत्ये तूत्तरं। प्राग्वार्धरात्रात्पूर्वं। ऊर्ध्वमुत्तरं। प्राग्वासूर्योदयात्पूर्वं। ऊर्ध्वमुत्तरमि
ति॥ इदंचाशौचमाहिताग्नेर्दाहदिनादारभ्य। अनाहिताग्नेर्मरणदिनादारभ्य कार्यं। धूर्तस्वामिरामा
डारास्तु आहतुः। आहिताग्नेरपि मरणाद्येव दशरात्रं॥ दशाहं शावमाशौचं इति मरणनिमित्तत्वात्त ६
स्य। यत्तु दाहादाशौचं तस्योक्तं तत्संस्कारनिमित्तं शौचं पृथगेव। तेन गृह्याग्नेः संस्कारांगं त्रिरा

त्रं। श्रौताग्नेस्तु दशरात्रमिति। अथातिक्रांताशौचं। तत्राशौचमध्ये जननादौ ज्ञाते पुत्रादीनां सर्वेषां शेषे
णैव शुद्धिरिति स्मृत्यर्थसारादयः। दशाहाद्यूर्ध्वं ज्ञाते मरणे आमासत्रयपर्यंतं त्रिरात्रं। षण्मासपर्यंतं पक्षिणी
नवमीपर्यंतमहः। ऊर्ध्वं स्नानं। जनने त्वतिक्रांताशौचं नास्त्येव पितुः स्नानं तत्रापि भवति। मृतकमप्यनु
पनीतादिनिमित्तकमतिक्रांतं नास्ति। किंतूपनीतनिमित्तकं ज्ञात्वाशौचमेव। माधवस्तु आत्रिपक्षात्त्रिरात्रं
आषण्मासात्पक्षिणी। आवर्षादेकाहः। ऊर्ध्वं स्नानमित्याह। तत्रापदनापद्विषयत्वेन व्यवस्था। इदं चैकदे
शे। देशांतरे तु स्नानमात्रं। माधवस्तु। अर्वाक्त्रिपक्षात्त्रिनिशं षण्मासाच्च दिवानिशं॥ अहः संवत्सरादर्वा
ग्देशांतरमृतेष्वपीति विद्वदुक्तेः। स्नानं वत्सरांत इत्याह। इदं सपिंडानां। देशांतरे स्नानं सोदकानामिति
युक्तमिति निर्णयसिंधौ॥ देशांतरलक्षणं। दशाहमध्ये यद्देशस्थेन मृतवार्ता श्रवणमशक्यं तत्त्व के
चित्तु प्रत्यहं योजनद्वयं गच्छन्पुरुषः यत्र मृतस्य वार्तामाशौचकालमध्ये प्रापयितुं न शक्नोतीति तत्। त

सं.स्का शावविप्रस्यदशाहाशौचिनः।विंशतियोजनैर्देशांतरं क्षत्रस्य द्वादशाहाशौचिनश्चतुर्विंशतियोजनैरित्याद्यू
७ ह्यमित्याहुः।महानद्यंतरादिकं च प्रसिद्धं।एतन्मातापितृभिन्ने।मातापितृमरणे दूरदेशेपि संवत्सरोर्ध्वम
पि पुत्रो दशाहादिपूर्णमाशौचं कुर्यात्।स्त्रीपुंसयोः परस्परं सवर्णोत्तरपत्नीषु चैवमितिस्मृत्यर्थसारे।स
पत्नमातुस्तु दक्षः।पितृपत्न्यामपेतायां मातृवर्ज्यं द्विजोत्तमाः।संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेदिति
हीनवर्णमातृषु सपत्नीषु चैवमितिस्मृत्यर्थः।केचित्पितुः पत्न्यां प्रमीतायामौरसे तनये तथेति ब्रह्मोक्ते
रौरसेपीदमाहुः।षडशीतावप्येवं एतदतिक्रांताशौचं सर्ववर्णसाधारणं।अथाशौचसंपाते।एकदिनद्व
योः शावयोर्वा समयोर्न्यूनाधिकयोर्वा संपाते तंत्रेणान्यसिद्धिः।द्वितीयादिदिनेषु सजातीयस्य स ७
मस्य न्यूनस्य वा संपाते पूर्वाशौचेन सिद्धिः।अधिकस्य तु न।विजातीयस्य तु शावे जननस्य समस्य न्यू
नस्यापि पूर्वेणशुद्धिरिति स्य वा संपाते पूर्वेणाशुद्धिः।अधिकस्य तु न।अस्यापि पूर्वेणाशुद्धिरिति

शुद्धिविवेकः जनने समन्यूनाधिकशावसंपाते न पूर्वेणशुद्धिः।केचित्तु दशाहाशौचयोः संपाते पूर्वेणशुद्धिः
त्र्यहाद्याशौचयोः संपाते तु नेत्याहुः।तन्न मिताक्षरापरार्कादिविरोधात्।अन्ये तु पूर्वप्रवृत्तमाशौचमुत्तरा
शौचकालादर्वागधिककालं स्यात्तदा पूर्वेणवोत्तरशुद्धिः।यथा गर्भपातनिमित्तषडहमध्ये दशापाते पूर्वे
णाशुद्धिरित्याहुः।तन्नाद्रियंते वृद्धाः।अथ वृद्धिमदाशौचं पाश्चिमेन समापयेदित्यादिनिषेधात्।पूर्वोत्त
राशौचांतरं तन्मध्योत्पन्ने ज्ञाते तूत्तरमेव कार्यं।यथोक्तं शुद्धितत्वे।पूर्वाशौचांतरुत्पन्नं समानं लघु वा निमि
त्तं तत्कालादुपरिश्रुतं स्वाशौचहेतुरेवेति दशमदिनरात्रौ तु पूर्वं निर्वर्त्य दशाहांतरसंपातेपि न पूर्वेणनिवृ
त्तिः।किंतु महह्यधिकं कार्यं।तद्रात्रिचतुर्थयामे तत्संपाते त्रिरात्रमधिकं।माधवस्तु दशमाहोरात्रे तत्संपा
तेष्वहद्वयमाह।हरदत्तस्तु पूर्वस्मिन्नाशौचे रात्रिशेषे यद्यन्यदापतेत्तदा द्वाभ्यां शुद्धिः।सा रात्रिः परेद्यु
श्चेत्यर्थः प्रभाते तिसृभिरिति अथ दशाहाद्यव्यतीते परेद्युः प्रभाते संगवे यद्यन्यदापतेत्तदा तिसृभि

सं॰कौ रित्याह। दशमदिनरात्रितच्चतुर्थयामयोस्त्र्यहादिसंपाते तु पूर्वेणाशुद्धिः। केचित्तु तत्रापि द्वित्रिदिनवृद्धिमाहुः
८ तन्न। दशमेह्नि पतेद्यस्याहः शेषात्स विशुध्यति। प्रभाते तु त्रिरात्रेण दशरात्रोरांशे यं विधिरिति देवलादिस्मृतिषु
दशाहविषयायाएवाद्वित्रिदिनवृद्ध्युक्तत्वात्। पाक्षिण्यामपि पातेपि त्र्यहादिरूपापत्तेश्च। अत एव त्र्यहाद्याशौ
चानांपरस्परं रात्रिशेषसंपातेपि पूर्वेणाशुद्धिर्न त्र्यहादिवृद्धिरित्याहुः। वर्धतद्वित्रिदिनमध्ये आशौचांतरसं
पातेन पूर्वेणाशुद्धिः। नागंतुके रह्णाहोभिराशौचमपनुद्यतइति ब्राह्मणोक्त्। केचित्तु तत्रापि दधिकाशौचसं
पातेनतन्निवृत्तिः॥ तत्समयन्यूनयोस्तु निवृत्तिरित्याहुः सपिंडाशौचेन मातृपितृभर्तॄणामाशौचं ना
पैति मातापित्रोरेकमध्ये मातर्यप्रमीतायामशुद्धो म्रियते पिता पितुः शेषेण पितृमरणनिमित्तपू
र्णाशौचेनशुद्धिर्न पूर्वेणेति मिताक्षरायां। पित्राशौचमध्ये मातृमरणे तु पित्राशौचं समाप्य पक्षिणी ८
मधिकां कुर्यात् दशमरात्रितद्यामयोर्मातृमरणे [illegible] त्र्यहत्र्यहसमुच्चितापक्षिणीति कश्चित्। गुरुणा

लघुश्च बाध्येदित्युक्तेर्न पृथक् पक्षिणीत्यन्ये। मातुरन्वारोहणे तु न पक्षिणी। यदा नारी विशेदग्निं प्रियस्य
प्रियवांछया। तदाशौचं विधातव्यं भर्त्रशौचक्रमेण हीति पृथ्वीचंद्रोदये लघुहारीतोक्तेः षडशीतिमतेपि।
मृतं पतिमनुव्रज्य पत्नी चेदनलं गता। न तत्र पक्षिणी कार्या पितृकादेव शुध्यति। पुत्रो वान्योऽग्निदस्तस्या
स्तावदेवाशुचिस्तयोः। नवश्राद्धं सपिंडं च युगपत्तु समापयेदिति। यत्तु परार्के ब्राह्मे। सर्ववेदवादात्साध्वी
स्त्री न भवेदात्मघातिनी। त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रवदिति। तद्दशाशौचोत्तरमन्वारोह
णे त्रिरात्राशौचपरमिति पृथ्वीचंद्रः। तद्ब्राह्मणादेः क्षत्रियादिस्त्रीभिरनुगमने त्र्याशौचपरमित्यपरा
र्कः। पूर्वशेषेणाशुद्धेरपवादांतरं षडशीत्यां। पूर्वाशौचेन या शुद्धिः सूतके मृतके च सा। सूतिकामग्नि
दं कृत्वा प्रेतस्य च सुतानपि। जननेशावसंपाते न पिंडदानादिति प्रतिबंधः शावे जननसंपाते न जात
कर्मादिप्रतिबंधः स्मृत्यर्थसारस्तु तदानीं वा शावानंतरं वा जातकर्मादीति विकल्पमाह। एवं द्वयोः

सं·कौ
९

त्राचयोर्जननयोर्वासंपातेद्रष्टव्यं।मातुःपक्षिणीमध्येपितुरेकाहंनकुर्यात् आद्यंश्राद्धमशुद्धोपिकुर्यादे
कादशेहनीतिस्मृतेः।अथाशौचापवादः।ब्रह्मचारिणःसपिंडमरणेनाशौचं।नान्त्यकर्मण्यधिकारः।।तत्क
रणेपुनःसंस्कारःकृच्छ्रश्च।पितृमातृगुरूपाध्यायाचार्यमातामहानामंत्यकर्मकार्यमेव।तत्रदशाहमस्पृश्य
त्वलक्षणमाशौचं।संध्याग्निकार्यादिकर्माधिकारस्त्वस्त्येव।माधवस्त्वत्रैकमाशौचमाह पित्राद्याशौचेपि
नाशौचिनामन्नंभक्षयेत्।भक्षणेपुनरुपनयनमाशौचंच नचतैःसहसंवसेत् दिवोदासीयेतुएकाहंशु
मविर्भूत्वाद्वितीयेहनिशुध्यतीतिब्राह्मोक्तेः।प्रथमेह्निसंध्यादिलोपः।द्वितीयादौपिंडदानएवकालाएवा
स्पृश्यत्वमात्रं।ब्रह्मचारीयदाकुर्यात्पिंडनिर्वपणंपितुः।तावत्कालमाशौचंस्यात्पुनःस्नात्वाविशुध्यति।
तिप्रजनादित्युक्तं।अंत्यकर्माकरणेतुपित्रादिमरणेपिनाशौचं।केचित्तुसमावर्तनोत्तरंपूर्वमृतानां
त्र्यहाशौचंकार्यं।आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात् समाप्तेतूदकंदत्वा त्रिरात्रमशुचिर्भ

वेदितिमनूक्तेरित्याहुः।अन्येत्वस्यविकल्पमाहुः।तथाकृतजीवच्छ्राद्धेनकिमप्याशौचंनकार्यमितिहेमा
द्रिः।वनस्थयतिपतितानांग्रहणेतुरात्रंपयःपानं।अनंतव्रतादिनियमवतांतत्संकल्पानंतरमाशौचे
पित्रतेनाशौचं।संकल्पात्प्रागाशौचेत्वन्येनकारयेत्।संप्रारब्धेषुदानोपनयनयजनश्राद्धेषुप्रति
ष्ठाचूडातीर्थयात्राजपपरिणयाद्युत्सवेषुनाशौचदोषः।प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः।।
नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रिया।तुलादानादेःप्रारंभोनांदीमुखंसंकल्पोवा।यजनंतडागो
त्सर्गकोटिहोमादि।पाकस्यपरिसमंतात्क्रियापाकप्रोक्षणमितिशुद्धिप्रदीपः।तीर्थयात्रायांप्रारब्धा
याअपूर्वतीर्थप्राप्तावाशौचेपितीर्थश्राद्धेनाशौचं।जपःपुरश्चरणादिः एवंदेवयज्ञादावपिदीक्षावतो
नाशौचमित्यागमग्रंथेप्युक्तं।उत्सवोरथयात्रादिषु।प्रारब्धप्रायश्चित्तव्रतानांतत्रनाशौचं।आतु
रस्यव्याधिनाशार्थेदानादौनाशौचं।राज्ञांव्यवहारदर्शनादौनतद्भृत्यानांतत्कार्येन।सूपकारा

दिकारूणांस्वकार्येन। निर्णेजिगादिशिल्पिनांस्वकार्येन। भिषजांचिकित्सायांन। बहुवेदपाठकानां
तत्पठनेन। एवंयत्रयत्रान्येनंगातिकत्वंतत्रतत्राशौचाभावोज्ञेयः। स्वदेशराष्ट्रभंगाद्यापदिवाशौचाभा
वः। मरणसमयेपिनाशौचं। स्वस्वकालेत्विदंसर्वंसूतकंपरिकीर्तितं। आपद्गतस्यसर्वस्यसूतकेपिन
सूतकमितिदक्षस्मृतेः। अतःसतिवैराग्येसंन्यासोप्यातुरस्यभवतीत्याहुः। शूलपाणिस्तूपसर्गमृतेचैवं
सद्यःशौचंविधीयतइतिपराशरोक्तेर्मारिकाद्युपसर्गमृतस्याप्याशौचंसपिंडानांनेत्याह। दीक्षितानां
दीक्षोर्ध्वमवभृथात्प्रागाशौचाभावः। तदादित्याशौचमस्त्येव। प्रागवभृथात्करोतिस्नातायामव
भृथइतिपत्न्यारजसिविशेषोक्तेः। उभययत्राशौचस्यतुतुल्यत्वात्। तेनवैतानामतेप्यवभृथात्स्ना
मवत्येव। यथोक्तंमाधवीयेब्राह्मे। तद्गृहीतदीक्षस्यत्रैविद्यस्यमहात्मनः स्नानंत्ववभृथेयावत्तावं
त्तस्यनसूतकमिति। ऋत्विजांवरणोत्तरंनाशौचं। केचित्तुमधुपर्कसहितेनवरणेनाशौचंवरणमा

त्रेत्वस्तीत्याहुः। अथाशौचेश्रौतेकर्मणिस्नातस्यत्यागमात्रेप्रधानातिरिक्तेअन्यस्यकर्तृत्वं। औपासनहोमस्यश्रौ
तत्वादयमेवइतिमिताक्षरायां। स्मार्तेषुपिंडयज्ञश्रवणाकर्मस्थालीपाकादिषुस्नानं। विनाप्रधानमात्रेधिकारः
प्रधानातिरिक्तेत्वन्यस्यैवेतिमिताक्षरायां। केचित्तुशालाग्नौचैकेइतिपैठीनसिस्मृतेः। स्मार्तेधिकारविकल्प
माहुः। अपरार्कादयस्तुश्रौतंसर्वंस्वयंकर्तव्यं। स्मार्तेतुत्यागमात्रं। अन्यत्राप्यन्यस्यकर्तृत्वमित्याहुः। वैश्वदेव
स्यत्वग्निसाध्यत्वेपिविप्रोदशाहमासीतवैश्वदेवविवर्जितइतिवचनान्निवृत्तिः। हरदत्तस्तुब्रह्मचैवैश्वदे
वःकार्यः तस्यहावनध्यायोयदात्माशुचिर्यद्देशइतिब्रह्मयज्ञस्यैवाशौचेविशिष्यनिषेधादित्याह। संध्या
चेष्टंकार्या। अमंत्रकंप्राणायामंकृत्वा मार्जनादिमंत्रान्मनसोच्चार्यमार्जनादिकृत्वासावित्रींवाचोच्चार्यस
र्यायार्घ्यंनिवेदयेत्। उपस्थानंनास्ति। मार्जनेपिविकल्पः केचिदेकार्घ्यमाहुः। ग्रहणेस्मार्तेदानादावपि
नाशौचं। अथद्रव्येष्वाशौचाभावः। नाशौचंशाककाष्ठाजिनलवणतृणाक्षीरनीराभिषेषुपुष्पमूलफ

तेन्चौषधमधुदधिघृतस्याज्जिलेध्यामभोज्यइति क्रयेतुसर्वस्मिन्नदोषः। पक्वग्रहणात्वन्नसत्रेप्रागुक्तं। वि
वाहादौतुपूर्वसंकल्पितंपरैरन्नंप्रदातव्यंभोक्तंचद्विजोत्तमैः। यदातुपूर्वसंकल्पिताभावभुंजानेषुविप्रे
षुअंतराशौचज्ञानं। दातृभोक्त्रोरन्यतरस्यभवतितदातथैवग्रासमुत्सृज्यान्यगेहोदकाचांताः शुद्धाः
उभाभ्यामपरिज्ञातेतुनदोषः। संसर्गाशौचिनोर्द्रव्यादेराशौचाभावः प्रागुक्तः। भुक्षितत्वेशुद्धिरित्यनुव
र्त्तौविष्णुः। प्रोक्षणेनपुस्तकमिति॥ अथमृतदोषाशौचाभावः। चंडालपतितजलसर्पनृपगोपब्राह्मण
वैद्युतदंदंष्ट्रिशृंगिनारिविविषोद्बंधनवह्निप्रायोनाशकशस्त्रप्रपतनचौरादिहतानां क्लीवानामित्या
दिदुर्मरणमृतानांनाशौचोर्ध्वदेहिकादिकार्यं। तत्करणेप्रायश्चित्तं भट्टकृतांत्येष्टिपद्धतौउक्तं। आ
हिताग्नेर्दुर्मरणेवैतानांप्रक्षिपेदप्सुआवसथ्यंचतुष्पथे पात्राणितुदहेदग्नावितिशरीरलाभेगं
गायामन्यमहानद्यांवाप्रक्षिपेत्। वत्सरांतेप्रायश्चित्तनारायणबलिकरणानंतरंश्राद्धंकार्यम्॥

द्वंदंपुत्राद्यभावे। तत्सत्वेतुसत्यर्थसारे। अथतेषांभक्ताः पुत्रादयः प्रायश्चित्तसमर्थाः संतिचेत्। आदौप्राय
श्चित्तंकृत्वातदैवकालांतरेसंवत्सरादर्वाक्दहनादिकंकृत्वाश्राद्धादिकंकुर्युः। अनित्यत्वादायुषइति। अत्र
नारायणबलिरस्त्येव॥ माधवस्तुलौकिकाग्नौदग्ध्वामंत्रवर्जितंअस्थीनिस्थापयेत्। वत्सरांतेप्रायश्चि
त्तनारायणबल्यादौकृतेस्थीनिक्षीरेणप्रक्षालयित्वाविधिनादहेदित्याह। हेमाद्रौतु। दाहयित्वाशवंतेषांशूद्रै
रविधिपूर्वकमित्युक्तं। प्रायश्चित्तंनारायणबलीभट्टकृतांत्येष्टिपद्धतौज्ञेयौ केचित्तुनारायणबलौकृते
प्यंत्यकर्मसपिंडवर्ज्यंकार्यं गोब्राह्मणहतानांचपतितानांतथैवच॥ व्युत्क्रमाच्चप्रमीतानांनैवकार्यासपिं
डतेतिवचनादित्याहुः। गयाश्राद्धमपितेषांकार्यं ब्रह्महाचकृतघ्नश्चगोघातीपंचपातकी। सर्वेतेनिष्कृ
तिंयांतिगयायांपिंडपातनादित्याग्निपुराणोक्तेः। आत्मवधनिमित्तंचतज्जातिवधप्रायश्चित्तेनस
मुच्चितंकार्यमितिनिर्णयसिंधौ। प्रायश्चित्तानर्हपतितानांतुतिलोदकंकार्यं। तदप्याहहेमाद्रौपा

सं॰कौ ब्राह्मे पतितस्यनुकारुण्याद्यस्तृप्तिं कर्तुमिच्छति। सहिदासीं समाहूयसर्वगां दत्तवेतनां अशुद्धघटहस्तां तांय
१२ थावृत्तं ब्रवीत्यपि॥ हेदासि गच्छ मौल्येन तिलानायैन सत्वरं॥ तोयपूर्णं घटं चेमं सतिलं दक्षिणामुखी। उपविष्टा
तु वामेन चरणेन नतः क्षिप॥ कीर्तयेः पातकिं संज्ञां त्वं पिबेति मुहुर्वद। निशम्य तस्य वाक्यं सा तद्व्यमूल्या
करोति नत्॥ एवं कृते भवेत्तृप्तिः पतितानां चान्यथेति॥ इदं च मृनाहे कार्यं॥ इदमात्मत्यागि विषयमिति गौ
डाः। एषामपि नारायणबलिर्गयाश्राद्धं च युक्तमिति निर्णयसिंधौ॥ पतितोदकविधिस्तु पित्राद्यतिरि
क्तविषय इति केचित्। सर्पहतेतु विशेषः। सर्पबलिपूर्वकं नारायणबलिं कुर्यात्॥ अपरार्के स्मृत्यंतरे॥
तदेवृश्चुध्यति प्रेतो नारायणबलीकृते॥ यो ददाति क्रियापिंडं तस्मै प्रेताय वैसुतः। तस्यैवाशौचमुद्दिष्टं
त्र्यहमेवन संशयः॥ विष्णुश्राद्धसमाप्तौतु त्रयोदश्यां दिनत्रयं॥ आशौचं पिंडदः कुर्यान्नतु तद्बंधुगोत्र
जा इति॥ अपुत्रस्यापि पतितस्य भक्तिमद्भिः पत्न्याद्यैर्नारायणबलिः कार्य इत्याहुर्देवयाज्ञिकाः। इ

दं सर्वं बुद्धिपूर्वं मृतानां पारवश्यादीनां न ज्ञेयं॥ प्रमादमरणे त्वाशौचादिकं भवत्येव। अथ कश्चित्प्रमादेन म्रि
येतात्युदकादिभिः॥ तस्याशौचं विधातव्यं कर्तव्याचोदकक्रियेत्यंगिरस्मरणात्॥ अत्र त्रिरात्रमाशौचमि
ति गौडाः॥ दशाहादीति दाक्षिणात्याः। अत्र नारायणबलिं केचिदाहुः॥ स्मृत्यर्थसारेतु प्रायश्चित्तं कृत्वा वि
धिना रहनाशौचोदकं सर्वं कार्यमि त्युक्तं। भट्टकृतांत्येष्टिपद्धतावप्येवं॥ प्रायश्चित्तं तत्राद्यं। प्रमादेन सर्प
तो मृते सर्पबलिः कार्य एव॥ तथाविधमरणेपि न दोषः। वृद्धः शौचस्मृतेलु प्तः। प्रत्याख्यातभिषक्क्रियः। आ
त्मानं घातयेत्तु भृग्वग्न्यनशनांबुभिः॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः॥ तृतीये तूदकं द
त्वा चतुर्थे श्राद्धमाचरेदिति। इदं जीर्णवानप्रस्थस्यैवेति विज्ञानेश्वरदेवयाज्ञिकादयः॥ तेन यत्यागे दे
नाधिकार इति केचित्॥ स्मृत्यर्थसारादौ तु सर्वाचिकित्स्यव्याधिपीडितविषयत्वमित्युक्तं॥ जलप्रवे
शे विशेषः॥ प्रयागातिरिक्ते अचिकित्स्यव्याधिपीडितानामेवाधिकारः॥ नान्येषां। प्रयोगे त्वरोगि

 पांरोगिणां च॥ एतच्च वृद्धादिमरणं कलौ निषिद्धं॥ भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथेति माधवेन क
 लिवर्ज्येषूक्तेः॥ प्रयोगे तु भवत्येव॥ न लोकवचनात्तातन वेदवचनादपि। मतिरुत्क्रमणीया ते प्रयागमरणं
प्रतीति मात्स्यादिषूक्तेरिति वृद्धाः॥ काश्यादिमरणमुक्तं मात्स्यादौ॥ अग्निप्रवेशाये कुर्युरविमुक्ते विधा
नतः॥ प्रविशंति मुखं ते मे निःसंदिग्धं वदाम्यहं॥ तीर्थमात्रे मरणमुक्तं हेमाद्रौ विवस्वता॥ सर्वेंद्रियविमुक्त
स्य स्वव्यापाराक्षमस्य च॥ प्रायश्चित्तमनुज्ञातमग्निपातो महापथः॥ धर्मार्जनासमर्थस्य कर्तुः पा
पां कृतस्य च॥ ब्राह्मणस्याप्यनुज्ञातं नी[illegible]प्राणविमोक्षणमिति अत्र दशाहमाशौचं त्रिरात्रस्य प्राप
ककालगोचरं॥ ब्रावीगि निबद्धाः॥ त्रिरात्रमिति निर्णयसिंधौ। एवं मरणांतप्रायश्चित्ते प्रपूर्त्यं। अथ
विधानादाशौचाभावः॥ यतिमरणे सापिंडानां नाशौचं॥ तत्संस्कारस्त्वन्यत्रोक्तः॥ एकादशेहनि
पार्वणं कुर्यात्॥ नैकोद्दिष्टं॥ बोधायनः॥ नारायणबलिश्चास्य कर्तव्यो द्वादशेहनि॥ अस्मपा

र्वणेन समुच्चयः। शौनकस्तु शौनकोहं प्रवक्ष्यामि नारायणबलिं परं॥ चंडालादुदगात्सर्पाद्ब्राह्म
णाद्वैद्युतामपि। दंष्ट्रिभ्यश्च पशुभ्यश्च रज्जुशस्त्रविषाश्मभिः। देशांतरमृतानां च मृतानां वान्यसाधनैः
जीवच्छ्राद्धमृतानां च कनिष्ठानां तथैव च। यतीनां योगिनां पुंसामन्येषां मोक्षकांक्षिणां। पुण्यायाद्यक्षया
र्थाय द्वादशेहनि कारयेत्। द्वादश्यां श्रवणाद्वांते पंचम्यां पर्वणोस्तु वेति। दत्तात्रेयः। एकोद्दिष्टं ज्वलं पिंडमा
शौचं प्रेतसत्क्रियां। न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे। वार्षिकादिति पूर्वभाविमासिकादिनिषेधो
न तु दर्शादेः। सन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथाविधीति वायवीयोक्तेः। इदं वार्षिकादिविधानं त्रिदं
डिनामेव। एकदंडिपरमहंसादीनां न किमपि कार्यमिति शूलपाण्यादयो गौडाः। सर्वेषामेवेति दाक्षिणा
त्याः। शुद्धमृतस्याप्याशौचाभावः प्रागुक्तः। कृतश्राद्धमरणे सपिंडैराशौचं कार्यं न वा। तदुक्तं हेमाद्रौ लैं
गे। मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयं। कालं गते द्विजे भूमौ खनेद्वापि दहेत वा। पुत्रकृत्यमशे

ध्वंकृत्वा दोषैर्नविद्यते।जीवत्यपिविशेषस्तेनैवोक्तः॥नित्यंनैमित्तिकंयत्तुकुर्याद्वासंत्यजेनवा।बांधवे
विमृतेतस्यनैवाशौचंविधीयते॥सूतकंचनसंदेहः स्नानमात्रेणशुध्यति।तथाहिताग्नौप्रोषितेमृतेतद्दाहात्पू
र्वंपुत्रादीनामाशौचंसंध्यादिकर्मलोपश्चनास्ति एतत्प्रागुक्तं।अत्रदेहस्यैवसंभवेदाहः।तदभावेत्वंदोगपरि
शिष्टे।विदेशमरणेस्थीनिआहृत्याभ्यज्यसर्पिषा।दाहयेद्दर्हिषाछाद्यपात्रन्यासादिपूर्ववत्॥अस्थ्नामभा
वेपार्णानिशालोकेन्युक्तया वृता।दाहयेदस्थिसंख्यानि ततःप्रभृतिसूतकमिति।हेमाद्रौ।कुर्याद्दर्भम
यंप्रेतंदर्भैस्त्रिदशषष्टिभिः।पलाशीभिः समिद्भिर्वासंख्याचैवंप्रकीर्तितेति।इदंनिरग्नेरपि।मदनरत्ने
वृद्धमनुः।प्रोषितस्यतथाकालोगतश्चद्वादशाब्दिकः।प्राप्तेत्रयोदशेवर्षेप्रेतकार्याणिकारयेत्।भ
विष्येतु।पितरिप्रोषितेयस्यनवार्तानैवचागमः।ऊर्ध्वंपंचदशाद्वर्षात्कृत्वातत्प्रतिरूपकं।कुर्यात्तस्य
तुसंस्कारंयथोक्तविधिनाततः।तदीयान्येवसर्वाणिप्रेतकार्याणिकारयेत्।द्वादशाब्दप्रतीक्षापि

तभिन्नविषयेतिमदनरत्नेउक्तं।गद्यकारिकायां।नूतनस्यपूर्ववयस्कस्यत्रिंशत्यब्दोर्ध्वतःक्रिया।ऊर्ध्वंपं
चदशाद्वत्सुमध्यमेवयसिस्मृता।द्वादशाद्वत्सरादूर्ध्वमुत्तरेवयसिस्मृता।चांद्रायणत्रयंकृत्वात्रिंशत्कृच्छ्रा
णिवासुतैः।कुशैःप्रतिकृतिंदग्ध्वाकार्याशावादिकाःक्रियाः।तिथ्यज्ञानेपराशरः॥देशांतरगतोनष्टस्ति
थिर्नज्ञायतेयदि॥कृष्णाष्टमीह्यमावास्याकृष्णावैकादशीनया।उदकंपिंडदानंचतत्रश्राद्धंचकारयेत्।
तत्राहिताग्नेःपूर्णाशौचंसर्वेषां।अनाहिताग्नेस्तुत्रिरात्रं।अनाहितेर्देहस्तदाहोगृह्याग्निनास्वयं॥
तदलाभेपलाशानांवृन्तैःकार्यःपुमानपि।वेष्टितव्यस्तथायत्नात्कृष्णसारस्यचर्मणा।ऊर्णासूत्रेणब
ध्वातुप्रलेप्तव्योयवैस्तथा॥स्तपिष्टैर्जलसंमिश्रैर्दग्धव्यश्चतथाग्निना।असौस्वर्गायलोकायस्वाहेत्यु
क्त्वासबांधवैः।एवंपर्णशरादग्ध्वात्रिरात्रमशुचिर्भवेदितिब्राह्मोक्तेः।इदंत्रिरात्रंदशाहमध्येदा
हे॥तत्रशेषभुक्तेरुक्तत्वात् किंतुतदूर्ध्वं।अनाहिताग्नेर्विधिवद्दाहाभावेतदानीमाशौचग्रहणंवे

सं.कौ कल्पितं तत्र पत्नीपुत्रयोः पूर्वमगृहीताशौचयोर्दशाहाद्येव। गृहीताशौचयोस्तु त्रिरात्रं। पत्नीमृतौ भर्तु
१५ श्चैवं। सपत्न्योश्चैवमिति स्मृत्यर्थसारे। अन्यसपिंडानां तु सर्वत्र पर्णशरदाहे त्रिरात्रं। तदाहांगिराः। दे
शांतरमृतं श्रुत्वा नाशौचं चेत्कथंचन॥ कालात्ययेपि कुर्वीत दाहकाले दिनत्रयमिति। स्मृत्यर्थसारे गृही
ताशौचानां स्नानमात्रमुक्तं॥ अथातीतसंस्कारः॥ स चेदंतर्हं स्यान्नार्दशाहं स्यात्तत्रैव सर्वं समापयेदू
र्ध्वमाहिताग्नेर्दाहात्सर्वमाशौचं कुर्यादन्येषु पत्नीपुत्रयोः पूर्वमगृहीताशौचयोः सर्वमाशौचं गृहीता
शौचयोः कर्मांगं त्रिरात्रमिति षडशीतावप्येवं। विश्वादर्शे तु प्रतिकृतिदहने त्वग्निदस्याः त्रिरात्रमि
त्युक्तं। द्वादशवर्षादिप्रतीक्षोत्तरं दाहे तु पुत्रादीनां सर्वेषां त्रिरात्रमिति कल्पतरुदिवोदासादयः। प्रेत
संस्कारकालस्तु अंत्येष्टिपद्धतौ ज्ञेयः। हेमाद्रौ वृद्धमनुः। अमृतं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकं॥ १५
प्रायश्चित्तमसौ स्मार्तं कृत्वाग्नीनादधीत च॥ जीवन्यदि समागच्छेद्घृतकुंभे निमज्ज्यतं। उद्धृत्य स्ना

पयित्वास्य जातकर्मादि कारयेत्॥ द्वादशाहं प्रेतचर्या त्रिरात्रमथवास्य तु। स्नात्वोद्वहेत तां भार्यामन्यां वा
तदभावतः। अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत्॥ अथैंद्राग्नेन पशुना गिरिं गत्वा च तत्र तु॥ इ
ष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः। अनाहिताग्नेस्तु कश्चरुः। मृतवार्तामात्रश्रवणे त्वाश्वलायनः
सुरभय एव यस्मिन् जीवे मृतजीव मृतशब्द इति। यस्य तु जीवत एव मृतवार्तां श्रुत्वा स्त्रिया सहगमनं कृतं
तद्वधमेवेति केचित्। तस्या वैधत्वादात्महत्यादोषोस्तीति निर्णयसिंधौ। तथा सर्पसंस्कारे कृते त्रिरात्रमा
शौचं सर्पसंस्कारः शौनकादौ ज्ञेयः। प्रायश्चित्तानिच्छोः पतितस्य जीवतोपि घटस्फोटे कृते एकाहमाशौ
चं॥ एकादशाहे श्राद्धं तानि प्रेतकार्याणि दाहवर्जं कुर्यात् उदकदानं च एतत्सर्वं तूष्णीं। घटनिनयने
नामग्रहणविधानादिति वृद्धाः। पिंडोदकश्राद्धानि नाम्ना दद्यादित्यपरार्कः। पतितस्य ज्ञातीनां घ
टस्फोटात्प्राक् धर्माधिकारो नास्तीत्यपि सः। घटस्फोटविधिस्त्वन्यत्र ज्ञेयः। कृतप्रायश्चित्तस्य

घटस्फोटे कृतेपि संग्रहविधिर्मिताक्षराद्यौज्ञेयः। तेषांजातकर्मादयः संस्काराः कार्याइत्यपरार्कः। केचित्त
कृतघटस्फोटस्यापिप्रायश्चित्तकरणानंतरं संग्रहविधिः पुनः संस्कारश्चकार्याइत्याहुः। नीचाभिगामि
न्यादिस्त्रीणांतुसंग्रहेपिवासोगृहांतिके पर्णकुट्यादौज्ञेयः। अन्नाछादनंप्राणधारणपर्याप्तंदेयंपुरु
षांतरेभ्योरक्षणंचकार्यमित्याद्यनुक्तंमिताक्षरादौज्ञेयं। अथदशाहमध्येदर्शपातेनिर्णयः। प्रवृत्ताशौच
तंत्रस्ययदिदर्शःप्रपद्यते। समाप्यचोदकंपिंडंस्नानमात्रंसमाचरेत्॥ ऋष्यशृंगः। आशौचमंतरादर्शोयदि
स्यात्सर्ववर्णिनां। समाप्तिंप्रेततंत्रस्यकुर्यादित्याहगौतमः। मातापित्रोस्तुश्लोकगौतमः। अंतर्दशाहे
दर्शश्चेत्तत्रसर्वंसमापयेत्। पित्रोस्तुयावदाशौचंदद्यात्पिंडाक्षतांजलीन्। इदंत्र्यहमध्येदर्शपाते। तदूर्ध्वं
दर्शेतुपित्रोरपितंत्रंसमाप्यमेव। पित्रोराशौचमध्येतुयदिदर्शः समापतेत्। तावदेवोत्तरंतंत्रंपर्यवस्य
त्र्यहात्परमितिगालवोक्तेः। अन्येषांत्र्यहमध्येपिसमाप्तिरितिनिर्णयामृतमाधवयोः। मदनपारि

जातमदनरत्नयोस्तुगालवीयमापद्नौरसपुत्रादिविषयं। त्र्यहोर्ध्वमपिनतंत्रसमाप्तिः पित्रोरित्युक्तम्।
अत्रदेशाचाराद्व्यवस्थेतिनिर्णयसिंधौ॥ कृत्स्नक्ष्मातलवर्तिपंडितजनालंकारचूडामणिर्गोदातीरज
निर्गुणोत्रयरवनिर्नोमापदेवोजनि। तत्सूनोरहजीवदेवकृतिनः सद्धर्मशास्त्रेकृतावाशौचस्यविनि
र्णयोयमभवच्छ्रीकृष्णसंतुष्टये॥ ॥ इतिश्रीमत्सकलभूमंडलमंडनायमानश्रीमद्विद्वद्वर्यायदेव
सुतजीवदेवकृतिकौस्तुभेआशौचदीधितिः समाप्तः॥ ॥ पुत्रः पत्नीचवपनंकुर्यादंतेयथावि
धि॥ पिंडदानोचितोन्योपिकुर्यादित्थंसमाहितइतिव्यासवचनेनपत्न्याअपिआशौचांतेवपनविधा
नात्॥ श्रीगणेशायनमः॥ गर्भाधानप्रभृतिविहितानेकसंस्कारशुद्धचित्ताद्दर्शेसकलमुनयोयं
प्रपश्यंतिदेवं॥ चंद्रादित्यानलप्रततडितांप्राप्रवाहेनिदानंवंदेवेदैः शिरसिनिहितंपालकंपांडवा
नां १ नत्वाहरिंगुरुचरणौवादिरणोद्येजयप्रदेविदुषां। मधुनाशनमोदावहमधुनासंस्कार

सं०प्र कौस्तुभं तनुमः २ अथ षोडशसंस्काराः॥ तत्र गर्भाधानं प्रथममुच्यते इतरसंस्कारान्प्रति तदुपजीव्यत्वे
१७ न तस्यैव स्मृतिकर्तृभिः गृह्यसूत्रकारैश्च गर्भाधानमृताविति उपनिषदि गर्भलंभनमिति च प्रथमं निर्दे
शात् तदुपयोगितया दुष्टरजोदर्शनशांतिं वक्तुं प्रथमरजोदर्शने तत्स्वरूपमुक्तं विधानपारिजाते नाभिमू
ले स्थितं पुष्पं चतुर्दलसमन्वितं तस्मिन्स्त्रीवीर्यं दधते गर्भसंभवकारणं॥ अधोमुखस्थितं स्त्रीणां तद्बाल्ये मु
कुलीकृतं। बाल्यात्परवयःप्राप्तो मुकुलं विकसद्भवेत्। उत्फुल्लं कुसुमं स्त्रीणां स्वभावेन स्रवेद्रजः। तदा प्रभृ
ति सर्वासां मासि मासि ऋतुर्भवेत्॥ दर्शने शुभाशुभसूचकानि कथ्यंते॥ अथ प्रथमरजोदर्शने मासफलं
भृगुः। चैत्रे स्यात्प्रथमर्तौ तु नारी वैधव्यभागिनी॥ वैशाखे धनपुत्राढ्या ज्येष्ठे रोगान्विता तथा। शुचौ मृ
तप्रजा प्रोक्ता श्रावणे धनधान्यभाक्॥ नभस्ये दुर्भगा क्लिष्टाप्याश्विने च पयस्विनी। ऊर्जेप्यायुष्मती ना
री मार्गशीर्षे बहुप्रजा॥ पौषे तु पुंश्चली नारी माघे पुत्रसुखान्विता॥ फाल्गुने श्रीमती नारी रजोमास

फलं क्रमादिति॥ अथ तिथिफलं श्रीधरीये गुरुः प्रथमायां पतिं हंति द्वितीयायां सुखं भवेत्॥ तृतीया
यां श्रियै स्याच्च चतुर्थ्यां वृषली भवेत्॥ पंचम्यां पुत्रलाभश्च षष्ठ्यां चारित्रविक्रया। सप्तम्यां पुत्रवृद्धिः
स्यादष्टम्यां पुत्रनाशनं॥ नवम्यां रुदती नित्यं दशम्यां धर्मशालिनी॥ एकादश्यां पतिस्निग्धा द्वादश्यां
क्रंदिनी भवेत्॥ त्रयोदश्यां मानधना त्वमरा बहुदोषकृत्॥ पर्वण्यन्यगृहीता स्याद्दिवादेवं तिथेः फल
मिति। कश्यपोपि। अष्टमी षष्ठ्यमा रिक्ता द्वादशी संक्रमेपि च॥ वैधृतौ च व्यतीपाते ग्रहणे चंद्रसूर्ययोः॥
विष्ट्यां संध्यासु निद्रायां दुर्भगा प्रथमार्तव इति॥ अथ पूर्वाह्णादिना फलं॥ स्मृतिरत्ने॥ शुभं चैव तु पूर्वा
ह्णे मध्याह्ने मध्यमं फलं॥ अपराह्णे तु वैधव्यं पूर्वरात्रे शुभं भवेत्॥ मध्यरात्रे मध्यमं स्यात् पररात्रे शुभान्वि
ता इति॥ स्मृतौ। प्रातःकाले सुतधना सायाह्ने सर्वभागिनी। मध्याह्ने तु भवेद्वेश्या निशीथे विधवा भवेदि
ति॥ अथ वारफलं॥ रुग्णा पतिव्रता दुःखी पुत्रिणी भगभागिनी॥ पतिक्रिया क्लेशभागा सूर्यभागा

सं.कौ. सूर्यवारादिषु क्रमात्॥ भानुवारे भवेद्व्याधिः सोमवारे पतिव्रता॥ दुःखिता भौमवारे तु बुधे सौभाग्यसंयुता॥
१४ श्रीसंयुता गुरोर्वारे पतिभक्ता भृगोर्दिने॥ मंदवारे निराशा स्यात्प्रथमर्तौ रजस्वला इति॥ अथ नक्षत्रफलं
गर्गः॥ सुभगा चैव दुःशीला वंध्या पुत्रसमन्विता॥ धर्मयुक्ता व्रतघ्नी च परसंतानमोदिनी॥ सुपुत्रा चैव दुः
पुत्रा पितृवेश्मरता सदा॥ दीना प्रजावती चैव पुत्राढ्या चित्रकारिणी॥ साध्वी पतिव्रता नित्यं सुपुत्रा कष्ट
चारिणी॥ स्वकर्मनिरता हिंस्रा पुण्या पुत्रादिसंयुता॥ नित्यं धनव्ययासक्ता पुत्री धान्यसमन्विता॥ मूर्खा
चारपुण्यवती दस्रर्क्षादेः क्रमात्फलं॥ पतिवत्याश्च दुष्टेषु प्रथमं स्याद्रजो यदि॥ पत्युस्तस्या भवेन्मृत्यु
स्त्रिपूर्वादिषु पंचसु च॥ मघाशाक्रादित्यादित्यवह्निभेषु च वा भवेत्॥ तत्रापि स्यान्महाशोको दारिद्र्यं चा
नपत्यता॥ तद्दोषपरिहारार्थं कुर्याच्छांतिं यथाविधि॥ तोषयेज्जपहोमाभ्यां तत्तन्नक्षत्रदेवताः॥ आचा
र्यादीन्समभ्यर्च्य भोजयेच्छक्तितो द्विजान्॥ तद्दुष्टेषु कृतेनाशु सर्वारिष्टं प्रणश्यति॥ इत्याश्वलाय

नस्मृतौ॥ अथ लग्नफलं॥ मेषे सव्यभिचारा स्याद्वृषभे परभोगिनी॥ मिथुने धनभोगाढ्या॥ कर्कटे व्यभिचारि
णी॥ पुत्राढ्या सिंहराशौ तु कन्यायां श्रीमती भवेत्॥ विचक्षणा तुलायां तु वृश्चिके तु पतिव्रता॥ दुश्चारिणी ध
नुः पूर्वे अपरे च पतिव्रता॥ मकरे त्वन्नहीना तु कुंभे निर्धनयुक्तला॥ मीने विचक्षणा लग्ने ग्रहसंस्थाद्वि
वाहवद्दिनि॥ अथ योगफलानि॥ दैवज्ञमनोहरे॥ आद्यर्तौ दुर्भगा नारी विष्कंभे चेद्रजस्वला॥ वंध्या चैवा
तिगंडे च शूले शूलवती भवेत्॥ गंडे तु पुंश्चला नारी व्याघाते चात्मघातिनी॥ वज्रे च स्वैरिणी प्रोक्ता
पाते च पतिघातिनी॥ परिघे मृतवंध्या च वैधृतौ पतिमारिणी॥ शेषाः शुभावहा योगा यथानामफल
प्रदाः॥ अन्यत्रापि नृसिंहः॥ परिघस्य तु पूर्वार्धे व्यतीपाते च वैधृतौ॥ संध्या सूपप्लवे विष्टामशुभं
प्रथमार्तवं॥ व्याघाते नव शूले तु नाड्यः पंच चतुर्दश॥ इति॥ अत्र संख्या याः विकल्पः॥ अथ लग्नसं
स्थग्रहफलानि॥ वसिष्ठः॥ वैधव्यमष्टमस्थे केंद्रे दृष्टोपारुचिर्भवेत्॥ अंगारके पतिहीनाबु

धवेद्दनपत्यता।दौर्भाग्यमिंद्रसंविवेसापत्न्यंभार्गवेभवेत्॥अव्रज्यासूर्यपुत्रेतुराहौतुकलहःसदा।अ
शुभंचैवकेतौस्याज्जामित्रेशुभदाःशुभाः॥अष्टमस्थइत्यस्यसप्तकंप्यंतेशुभत्येकमनुषंगः।जामित्रे
सप्तमस्थाने॥नरसिंहोपि॥लग्नस्यसप्तमस्थानेसूर्योवैधव्यकारकः॥पुत्रहानिकरस्त्वारोबुधः
सत्पुत्रदोभवेत्॥बृहस्पतिर्धनायुष्यंशुक्रःसाफल्यमेव च॥शनैश्चरेतुवंध्यास्याद्राहौतुमरणंध्रुवं॥
चंद्रेसद्गुणसंयुक्तेदेवरातमतोशुभमिति॥अथवस्त्रफलं॥गर्गः॥सुभगाश्वेतवस्त्रास्याद्दृढवस्त्राप
तिव्रता॥क्षौमवस्त्राक्षितीशास्यान्नववस्त्रासुखान्विता॥दुर्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवा
ससा॥नीलांबरधरानारीविधवापुष्पिताततः॥मलिनांबरधरानारीदरिद्रास्याद्रजस्वला॥व
स्त्रेस्युर्विषमारक्तबिंदवःपुत्रमाप्नुयात्॥समाश्चेत्कन्यकाचेतिफलंस्यात्फकंस्यात्रयमातेव
दृति॥अथस्थानफलं॥ग्रामाद्बहिःपरग्रामेनारीस्याद्व्यभिचारिणी॥पतिव्रतापतिस्थानेसु

भगागृहमध्यतः॥ग्राममध्येतुवृद्धिश्चविधवाचदिगंबरा॥उपरागेन्चदुःशीलाआयुष्यंजलसंन्निधौ।
धनमध्येतुकन्यायाधनधान्यसमृद्धिदेति॥देवरातः॥संमार्जनीकाष्ठतृणाग्निशूर्पान्हस्तेदधाना
कुलटातदास्यात्॥तत्त्योपभोगेतपासिस्थितावेदृष्टेरजोभाग्यवतीतदास्यादिति॥अथप्रथमरजोदर्शने
शिष्टाचारः॥कश्यपः॥प्रथमर्तौतुपुष्पिण्याःपतिपुत्रवतीःस्त्रियः॥अक्षतैरासनंकुर्युस्तस्मिंस्ता
मुपवेशयेत्॥हरिद्रापुष्पगंधादीन्दद्यात्तांबूलकंस्रजं॥आशिषोवाचयेयुस्ताःपतिपुत्रवतीभव।
दीपैर्नीराजनंकुर्यात्सदीपेवासयेद्गृहे॥ताःसर्वाःपूजयेत्सम्यक्गंधपुष्पाक्षतादिभिः॥लवणापूपमुद्गा
दिदद्यात्ताभ्यःस्वशक्तितइति॥ ॥इदंचसर्वंशुभाशुभनिरीक्षणंप्रथमर्तौद्वितीयेवाकार्यंतदुक्तंवराह
णा।प्रथमर्तौद्वितीयेवाशुभाशुभनिरीक्षणं॥कर्तव्यंज्ञातिभिःसम्यग्धर्मशास्त्रविधानतइति॥ ॥अ
थसर्वर्तुसाधारणनियमानाह॥वासिष्ठः॥त्रिरात्रंरजस्वलाशुचिर्भवेत्॥सान्नांज्यान्नाभ्यंज्यान्ना

सं. र.
२०

भुस्नायादधः शयीत न दिवा स्वप्यान्नाग्निं स्पृशेन्न रज्जुं सृजेन्न दंतान्धावयेन्न मांसमश्नीयान्न ग्रहा
न्निरीक्षेत नाश्लीलं किंचिदाचरेत्॥ न खर्वेदपि वेदं जालिना वा पिबेल्लोहेनायसेन वा विज्ञायत इति। लो
हेण ताम्रेण॥ तथा॥ यान खानि निकृंतते तस्यै कुनखी या प्रलिखते तस्यै खलतिर्यापर्णे न पिबति तस्या
उन्मादुकं इति तैत्तिरीयश्रुतौ नखनिकृंतनं भूमौ रेखाकरणं पर्णेन पानं च निषिद्धं। बौधायनोपि॥ अ
थ यद्यामलवद्वासास्यान्नैनया सह संवदेत न सहासीत नास्यान्नमद्याद् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमु
च्यास्ते थो खल्वाहुरभ्यंजनं वा स्त्रिया अभ्यंजनमेव न प्रतिग्राह्य काममन्यदिति। नैनामुपनयेन्ना
रण्येन पराचीनं स्नातीति वा भ्यंक्तेन प्रतिलिखिते नाभ्यंक्तेन दंतान्धावते न नखानि कृंतते न कृणत्
ति न रज्जुं सृजति न पर्णेन पिबति न खर्वेणेति॥ अनया संभाषणे प्रतिप्रसवो धर्मप्रश्ने ब्रह्मणा ध्ये
ष्यमाणो मलवद्वाससैन संभाषितुं ब्राह्मणेन संभाष्य तया संभाषेत संभाष्यतु ब्राह्मणेनैव संभा

ष्याधीयीतेवं तस्याः प्रजा निःश्रेयसं। प्रजानिःश्रेयसमिति वचनाद्विधवाभिः संभाषणे नैतत्कार्यमिति
हरदत्तः॥ शौचगानरोदनहसनपाननारीयुतानुलेपनं दिवास्वप्नं दंतधावनमैथुनं कामिकं वाचिकं मान
सिकं देवतार्चनं नमस्कारं रजस्वलांगना स्पर्शं तत्संभाषणं रजोवदुस्त्रापांसंत्यागं च न कुर्यात्॥ इति वि
ष्णुः॥ यद्यविदक्षेण॥ अंजनोभ्यंजने स्नानं प्रवासं दंतधावनं॥ न कुर्यात्सार्तवा नारी ग्रहाणामीक्षणं
तथेति स्नानमात्रं निषिद्धं तथाप्युपरागादिनिमित्तकस्नाने प्रसक्ते वसिष्ठेन नास्कस्नायादिति मज्ज
नं निषिध्यते॥ अत एव पराशरेण नियमः स्मर्यते॥ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला॥ पात्रांतरि
ततोयेन स्नानं कृत्वा व्रतं चरेत्॥ सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन॥ न वस्त्रपीडनं कुर्यान्नान्य
द्वासश्च धारयेत्॥ इति॥ रजस्वलायाः प्रथमदिननिर्णयस्तु पारिजाते चतुर्विंशतिमते॥ पूर्वार्धं शयो
स्तु रात्रौ चेज्जननं मरणं रजः॥ दृष्टं पूर्वदिनादित्वं तत्तीयेत् त्तरेहनि॥ केचिद्दिवोदिते सूर्ये जननं म

कौ॰सं रणंतथा॥ रजोवाहस्पतेस्त्रीणांयस्याहस्तस्यशर्वरी॥ अपरेत्वर्द्धरात्रात्प्राक्कुर्मतोरजसिसूतके। पूर्वमेवदिनंग्रा
२१ ह्यमर्थंचेदुत्तरेहनीति॥ अत्रदेशाचारतोव्यवस्था॥ स्नातायाः कालांतरेपुनः रजोदर्शनेत्रिरात्रव्रताभावव्यवस्थोक्ता
तत्रैवसंग्रहे॥ सातुस्नातायातुयाप्रौढा पुनरेवरजस्वला॥ स्नानान्तसप्तदशाहन्तशौचेनैवशुचिर्भवेत्॥ अष्टादशा
हेत्वेकाहंद्व्यहमेकोनविंशतौ॥ विंशत्प्रभृत्युत्तरेषुत्रिरात्रमशुचिर्भवेत्॥ एतद्यस्याः किंचिद्धीनेपूर्णेवामासिर
जोनियमस्तद्विषयं॥ कश्यपस्तु॥ एकादशाहेत्वेकाहंत्रिरात्रंद्वादशेहनि॥ ऊर्ध्वंत्रिरात्रंविज्ञेयमितिकुंडलि
नोदिनामिति॥ एतत्सप्ताहादूर्ध्वंयस्यारजोनियमस्तद्विषयं॥ अथरजस्वलाशुद्धिप्रकारः॥ ॥स्मृत्यर्थसारे॥ र
जस्वलाषष्टिमृत्तिकाभिः शौचंकृत्वामलंप्रक्षाल्यदंतधावनपूर्वकंसंगवेनस्नायादिति। स्नानोत्तरंविशे २१
षः॥ स्नात्वान्यंपुरुषंनारीनस्पृशेत्तुरजस्वला॥ यदिस्पर्शेत्तदाप्रायश्चित्तमाह॥ ईक्षयेद्भास्करंदेवंब्र
ह्मकूर्चंततः पिबेत्॥ केवलंपंचगव्यंचक्षीरंवाचात्मशुद्धय इति लैंगे॥ ज्वरितायाः शुद्धिस्तुसंग्रहे॥ आतुरा

चेदृतुमती तस्याः स्नानंकथंभवेत्॥ दृष्ट्वातुतांपरस्नायाद्दशकृत्वोह्यनातुरा॥ वासोभिर्दशभिश्चैवपरधाप्य
यथाक्रमं॥ ब्राह्मणान्भोजयित्वाथपुण्याहेनविशुध्यति॥ आतुराणांतुसर्वेषांएवंशुद्धिर्विधीयतइति। रजस्व
लयोः परस्परसंसर्गेशुद्ध्युपायः स्मृतिमंजर्यां॥ उदक्येद्वेतुसंस्पृष्टेसवर्णेचैकभर्तृके॥ तयोः स्नानंमिथस्प
र्शेपंचगव्यंततः पिबेत्॥ सवर्णेयोनिसंबंधेसगोत्रेचरजस्वले॥ मिथः स्पृशेदमत्यातुस्नानमात्रेणशुध्य
ति॥ मत्यैकरात्रंनाश्नीयात्पंचगव्यंपिबेत्ततः॥ उदक्ययोर्यदान्योन्यमसंबंधः सवर्णयोः॥ स्पृशेदमत्यास्ना
त्वाचतस्मिन्नाद्याच्छुचिर्भवेत्॥ मत्यातुनाद्यादाशुद्धेस्पृष्ट्वाचेत्सानिवासरं॥ उपोषणंतदाकेचिदकृत्स्न
द्विनसंख्यया॥ उपवासेनशक्ताचेतत्समंदानमाचरेत्॥ संभाषेतांस्पृशेतांवाब्राह्मण्योचरजस्वले॥ अश्ना
नकालान्नाश्नीतांतत्रैमत्यामिथश्चेच्चित्॥ स्नात्वोपवासंकुर्यातांपंचगव्येनशुध्यतः॥ एवमभ्यासतःशुध्ये
प्रायश्चित्तंसमाचरेत्॥ मत्यारजस्वलान्योन्यंवृषलीब्राह्मणीभवेत्॥ भवेदित्यन्ततः पूर्वंस्पृष्टेतिशेषः।

सं॰कौ ब्राह्मण्याः कृच्छ्रमेकं तु शूद्री पादेन शुध्यति॥ कश्यपः॥ रजस्वला सूतिका वा चांडालं यदि संस्पृशेत्॥
२२ आ स्नानकालान्नाश्नीयादिति कृच्छ्रं समाचरेत्॥ ज्ञानतः स्पर्शने तत्॥ चांडालं सार्त्तवा नारी संस्पृशेद्वा ज-
न्मांतरे॥ वाग्यता बहिरासीत स्नानकालादुपोषणी॥ प्राजापत्यं चरेत्पश्चात्पंचगव्यं ततः पिबेत्॥ विप्रान्
द्वादशसंख्याकान्भोजयित्वा तु शुध्यति॥ पृथिवीं संस्पृशन्मोहादशुद्धं वा नरं स्पृशेत्॥ स्नानादर्वाक् भुं-
जीत भुक्त्वा कृच्छ्रं समाचरेत्॥ मोहाज्ज्ञानतः॥ स्पृष्टोदक्या पंचनखाद्विशाकैकशफान्यशन्। अंडजा-
नि च सर्वाणि नाद्यादा स्नानवासरात्। पाराशरः॥ रजस्वला यदा दष्टा शुना जंबुकरासभैः॥ पंचरात्रं नि-
राहारा पंचगव्येन शुध्यति॥ ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा॥ चतुर्गुणं स्मृतं मूर्ध्नि दंशेऽन्यत्र
व्रती भवेद् इति॥ ॥ दुष्टरजोदर्शननिर्णयः॥ शांतिमाह शौनकः॥ आर्तवान्तां तु नारीणां शांतिं व- २२
दामि शौनकः॥ अन्नपुत्रादिलाभाय दंपत्यो रतिवृद्धये॥ पंचमेऽह्नि चतुर्थेऽह्नि ग्रहानिष्टपुरःस-

रं॥ तस्मिन्नहनि कर्तव्यः स तु होमो विधानतः॥ आचार्यं वरयेत्प्राज्ञो भुवनेश्वरितुष्टये॥ होमार्थं च जपार्थं च व-
रयेदृत्विजो बहून्॥ यजमानो द्विजैः सार्धं शांतिहोमं समाचरेत्॥ गृहादीशानदिग्भागे देवतापूजनाय च॥
द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत्॥ कुंभत्रयं न्यसेद्राशौ तं तु वस्त्रादिवेष्टयेत्॥ पूरयेत्तीर्थसलिलैः
प्रतिकुंभं पृथक्पृथक्॥ सूक्तेनाथ नवर्चेन प्रसव आप इत्यथ॥ सत्वयाप्रवतस्ताहृक्रायत्र्या च ततः क्रमात्। म-
ध्यकुंभे क्षिपेद्धान्यमोषधानि च हेम च॥ ततश्च पंचरत्नानि गंधपुष्पाक्षतादिकान्॥ ओषधानि च वक्ष्यंते
मुनिभिः शांतिकारणात्॥ औदुंबरः कुशा दूर्वा राजीवं चंपकं बिल्वकाः॥ विष्णुक्रांता च तुलसी वर्हिबर्हं रसपु-
ष्पिका॥ शतावर्यश्वगंधा च निर्गुंडी शर्पपद्वयं॥ अपामार्गः पलाशश्च पनसो जीवकस्तथा॥ प्रियंगवश्च गोधू-
मा व्रीहयो यवाश्च एव च॥ क्षीरं च दधि सर्पिश्च पद्मपत्रं तथोत्पलं॥ कुरंटकत्रयं गुंजा वचा भद्रकमुस्तकी इति॥
द्वात्रिंशदोषधानीह यथासंभवमाहरेत्॥ गजाश्वरथवल्मीकसंगमाद्ध्रदगोकुलात्॥ राजद्वारप्रदेशाच्च

सं॰कौ मृन्मानीयनिःक्षिपेत्॥ कुंभस्थापनइत्येतेतन्मंत्रेणकारयेत्॥ मृत्तिकांचौषधादीनि मंत्रेणप्रक्षिपेत्क्रमात्॥
२३ कुंभोपरिन्यसेत्पात्रंकांस्यंवाताम्रमेववा॥ मृन्मयंनवपात्रंवा स्वस्यवित्तानुसारतः॥ पात्रोपरिन्यसेद्धस्तंप्र
तिमांभुवनेश्वरीं॥ तन्मूर्त्यंवान्यसेन्यत्र इंद्राणींचपुरंदरं॥ आचार्यःपूजयेद्देवीमंगावरणानिच॥
अन्योवापूजनंकुर्यात्क्रायत्रामंतसारस्या॥ इंद्राणींपूजयेद्देवीं इंद्राणीमासकेनारिपु। क्रमेणपूजयेदिंद्रमिंद्र
त्वावृषभंवयं॥ अनेनविधिनाचार्यःपूजयेद्देवतात्रयं॥ आवाहनादिसकलैरुपचारैःपृथक्पृथक्॥ तन्म
ध्यमंस्पृशन्कुंभंमंत्रेणभुवनेश्वरीं। जपेदाचार्यआहोमाच्छ्रीसूक्तंचजपेत्ततः॥ स्पृशन्वैदक्षिणंकुंभंऋ
त्विगकोजपेदथ॥ चत्वारिरुद्रसूक्तानिचतुर्मंत्रोत्तराणिच॥ संस्पृशन्नुत्तरंकुंभंश्रीरुद्रंरुद्रसंख्यया॥
त्रीनिंद्राग्नीसूक्तंचतत्रचैवंस्पृशन्जपेत्॥ कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत्॥ कृत्वाज्यभाग २३
पर्यंतंहविरुद्वासनादिकं॥ तिस्रभिश्चैवदूर्वाभिरेकैकाचाहुतिर्भवेत्॥ अभिमंत्र्यप्रमुक्ताभिर्गाय

त्र्याजुहुयात्क्रमात्॥ अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा॥ तिलमिश्रैश्चगोधूमैर्द्रव्येणाद्याहुतिर्हुनेत् ऽक्र
हुयात्तायसन्नेवआज्येनचरुणेक्रमात्॥ हविस्तुष्टयेनैवप्रत्येकंसमसंख्यया॥ गायत्र्यैवचहोतमंहविर
त्रचतुष्टयं॥ ततःस्विष्टकृतंकृत्वारुद्रकमहरणंतथा॥ अयाश्चेत्यादिभिर्हुत्वासमुद्रादूर्मिसूक्ततः॥ संततामाज्य
धारांतांपूर्णाहुतिमथाचरेत्॥ परिषेचनपर्यंतंहोमशेषंसमापयेत्॥ सहौषधिस्थितेस्तत्रप्रतिकुंभस्थितो
दकैः॥ संतुमत्यांस्थितांशांतिंदंपतीभ्यांकरवायच॥ शांतिरभिषेकः॥ अथाभिषेकमंत्राश्चप्रोच्यंतेशौनका
दिभिः॥ आपोहिष्ठेतिनवभिःसूक्तेनचततःपरं॥ इंद्रोअंगतचेनैवपावमानैःक्रमेणतु॥ उभयंशृणवच्चन
स्वस्तिदाविशएकया॥ त्र्यंबकेणाथमंत्रेणजातवेदसएकया॥ समुद्रज्येष्ठाइत्यादिचतुर्भिश्चप्रसिद्धकैः
त्रायंतामितिमंत्रैश्चत्रिभिश्चाभिर्यथाक्रमं॥ इमाआपत्चेनैवदेवस्यत्वेतिमंत्रतः॥ मंत्रेणाथतमी
नानंत्वमग्नेरुद्रइत्यथ॥ तमुष्टुहीतिमंत्रेणभुवनस्यपितरंतथा॥ यातेरुद्रेतिमंत्रेणाशिवसंकल्पमं.

त्रन:॥इंद्र त्वा वृषभं वयं मंत्रेश्चाथाभिषेचयेत्॥साच वस्त्रांतरं धृत्वा पुनश्चोपवसेत्सती॥उपवासोत्र समीपाव
स्थानं॥विप्रान्विधिवदभ्यर्च्य गंधपुष्पाक्षतादिभिः॥धेनुं पयस्विनीं दद्यादाचार्याय स्वभूषणै:॥सदक्षिणम
नड्वाहं प्रदद्यादुद्गापिने॥ऋत्विग्भ्यश्चापि सर्वेभ्यो दद्याद्दक्षिणां ततः॥महाशांतिं प्रजप्याथ विप्राशीर्वाच
नं ततः॥ब्राह्मणान्भोजयेत्पश्चाद्भुंजीत स्वजनैः सह॥स्मृतौ॥ब्राह्मणान्भोजयित्वा तु देवज्ञं भोजयेत्ततः॥ए
वंयः कुरुते शांतिं शौनकोक्तप्रकारतः॥तदनिष्टं तु सकलं सद्य एव विनश्यतीति।जपेदाचार्य इति॥अन्वा
धानात्मक होमतन्त्रारंभपर्यंतमित्यर्थः॥अनेनैवाशनेनान्वाधानं ततः कुर्यादिति श्लोके आचार्यग्रहणं॥
ततश्चाग्निस्थापनादि ग्रहपूजांतं यजमानेन कर्तुमुचितं॥अपयेत्तत्रेति ग्रह सिद्धान्न ग्रहणं व्यावर्त्यते॥सा
वित्री च हविश्चैव तदित्य त्रात छन्दनहविश्चैव तुष्टयस्थागकाल सविनृ इति चतुर्थ्यंतेन देवतोद्देशः कार्य इ
ति ज्ञाप्यते लभ्यते चात्र मंत्र संवादः।पार्वणा विनित द्वितदि संवादिनो मंत्रा पूर्णमासस्येत्युद्देशांगो

क्रियते माश्विके:॥संवादे तु केसुतिकन्यायनैव तत्सिद्धः॥नचैवं भुवनेश्वरी दैवत्य होमाभावापत्तिः।वाचनिकत्वे
नदृष्टत्वात्।वस्तुतस्तु भुवं प्राणिप्रसव इति धातोर्युत्पन्नः सवितृ शब्दः प्रकृतफलदातृत्वेन प्रथमप्रयाजे
सामिधं रोगेनेरिवल्लिंगानादेरणा भुवनेश्वरी प्रतिपादिक इति न विरोधः॥मुख्य दक्षिणाऽशक्तो निष्क्रयो दक्षिणा
देया॥तमाह कात्यायनः॥दशकार्षापणा धेनाविति अष्टावनडुहि स्मृता इति च कार्षापणे निरदः॥कार्षापणो
दक्षिणस्यां दिशि रौप्यः प्रवर्तते॥पणैर्निबद्धः पूर्वस्यां षोडशैव पणाः सतीति॥ ॥अथ शांति प्रयोगः॥बहुत
रदुष्ट दोषैर्दुष्टे प्रथमरजोदर्शने द्वितीयादिरजोदर्शनोत्तरं स्वल्पदोषदुष्टे तु तदनंतरमेव गर्भाधानं प्रत्यासन्न
दिने सा कार्या।कर्ता पत्न्या सह कृतस्नानादिनित्यक्रियः पवित्रपाणिराचम्य प्राणानायम्य देशकालौ सं
कीर्त्याऽस्या मम भार्यायाः प्रथमरजोदर्शने ईदृशाद्दुष्टमासादि सूचित सर्वारिष्ट परिहार द्वारा श्रीप
रमेश्वर प्रीत्यर्थं सग्रहमखां शौनकोक्तां शांतिं करिष्ये इति संकल्प्य गणपतिपूजनादि आचार्यति

सं॰ को॰ ग्वरणंतंकुर्यात्॥आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः॥तथास्मिंत्वंममयज्ञेस्मिन्नाचार्योभवसु
२५ व्रतेस्याचार्यस्य।अस्ययागस्यनिष्पत्तौभवंतोप्रार्थितामया॥सुप्रसन्नैःप्रकर्तव्यंशांतिपूर्वकमित्यृत्वि
जां॥ततोगंधवस्त्रादिभिःयथाशक्तितेषांपूजनं॥ततःआचार्यःपवित्रपाणिःदेशकालौसंकीर्त्ययज
मानानुज्ञयाचार्यकर्मकरिष्ये इतिसंकल्प्ययदत्रसंस्थितमितिप्राच्यादिदिक्षुप्रादक्षिण्येनसर्षपान्
विकीर्यशुचीवइतितृचेनपंचगव्येनतथैवप्रोक्ष्यापोहिष्ठेतितृचेनशुद्धाद्भिःतथैवप्रोक्ष्यकृतांजलिःस्व
स्त्ययनंतार्क्ष्यमितिमंत्रद्वयेनदेवतांसंप्रार्थ्यभुवनेश्वर्यादिप्रतिमात्रयस्यअग्न्युत्तारणंकुर्यात्॥अ
ग्निःसप्तिमितिसूक्तस्यवैश्वानरोग्निस्त्रिष्टुप् अग्न्युत्तारणेवि॰ अग्निपदरहितेनाग्निःसप्तिमि
तिसूक्तेनअभिषिच्यपुनरग्निपदयुक्तेनतेनैवाभिषिंचेत्॥ इत्यग्न्युत्तारणं ततोगृहादीशान्यां २५
मध्येतद्दक्षिणोत्तरयोश्चमहीद्यौरितिमंत्रात्स्याभूमिंस्पृष्ट्वाओषधयःसमितिद्रोणप्रमाणव्री

हिभिःतेषुदेशेराशित्रयंकुर्यात् पंचगुंजाधिकंपरिमाणंकचेलेग्नेविंशत्यधिकत्रिंशत्कृष्णारात्मकं पलंस्कपर्णा
श्चत्वारःकुडवंप्रस्थमाढकं।द्रोणंखारिकाचेतिपूर्वपूर्वाच्चतुर्गुणं॥इतिषोडशप्रस्थात्मकोद्रोणः॥ततःआकल
त्रोक्षितिमध्यदक्षिणोत्तरक्रमेणप्रक्षालितमव्रणमकालकंकुंभत्रयंसादयेत् प्रसुवआपइत्यस्यसूक्तस्यसिं
धुक्षित्प्रैयमेधोनद्योजगती कलशेषूदकपूरणेविनियोगः।याःप्रवतइत्यस्यवसिष्ठोनद्यःशक्करी।कलश
पूरणे॰ याःप्रवतइतिऋक् प्रतिकलशंपूरणादिमंत्राणामावृत्तिः।ततःगंगाद्वारामितिगंधं याओषधीरि
तिसर्वौषधीः।ओषधयःसमितियवांश्चत्रिषुपुक्तक्रमेणक्षिपेत्हेमपंचरत्नपक्षेपोत्तरंनागंधादिप्रसे
पः।इतिवक्ष्यामः ततोमध्यमकुंभेगायत्र्यायवव्रीहितिलमाषकंगुश्यामाकमुद्गान्क्षिप्त्वा सप्तद्रव्यप्रसे
पोनगायत्र्येतिरुद्राः।तथैवउडुंबरकुशदूर्वारक्तोत्पलचंपकबिल्वविष्णुक्रांतातुलसीबर्हिःशंखपु
ष्पीशतावर्यश्चगंधानिर्गुंडीरक्तपीतसर्षपापामार्गपलाशपनसजीवकप्रियंगुगोधूमव्रीहयश्चसदधिदु

गंधघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचाभद्रमुस्तकाख्यानि द्वात्रिंशदौषधानि यथासं
भवं वा प्रक्षिप्य त्रिष्वपि कलशेषु हिरण्यरूपद्युति हिरण्यं सह रत्नानीति पंचरत्नानि प्रक्षिप्य या ओषधी
रिति सर्वौषधीः ॐ ओषधयः सामिति यवान्। कांडात्कांडादिति दूर्वाः। अश्वत्थेव इति पंचपल्लवान्निक्षिप्य।
युवा सुवासा इति सूत्रेण वाससा वा वेष्टितान् कलशकंठान्कृत्वा पुष्पमालादिभिः कलशान्भूषयेत्॥
ततः कलशानामुपरि धातुमयं वैणवं मृन्मयं वा पूर्णपात्रत्रयं स्वशक्त्यनुसारेण पूर्णादर्वि इति मंत्रा
वृत्या निधाय तदुपरि श्वेतवस्त्रत्रयं चंदनादिकृताष्टदलयुक्तं न्यसेत्॥ मध्यमे स्थापितप्रतिमायां
भुवनेश्वरीमावाहयेत्॥ भुवनेश्वरीध्यानं उद्यद्दिनद्युतिमिंदुकिरीटां तुंगकुचां नयनत्रययुक्तां
स्मेरमुखीं वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीं। गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री
पूजने॰ भुवनेश्वरीमावाहयामि एवं दक्षिणकलशे इंद्राणी वृषाकपिरिंद्राणी पंक्तिः। इंद्राणी पू॰ मोग्यः

इंद्राणीमासु ऋक्। एवमुत्तरकलशे इंद्रत्वा विश्वामित्र इंद्रो गायत्री इंद्र पू॰ इंद्रत्वा ऋक् ततो मध्यमकल
शे अंगाद्यावरणदेवताध्यानम्। अंगाद्यावरणदेवताः आवाहयामीत्यावाह्य संप्रणवगायत्र्यंते अंगाद्या
वरणसहितायै भुवनेश्वर्यै आसनं समर्पयामीत्येवं षोडशोपचारैर्भुवनेश्वरीं संपूज्य उक्तमंत्राभ्यां
कांडानुसमये इंद्राणींद्रयोः षोडशोपचारैः पूजां कुर्यात्॥ अशक्तौ भुवनेश्वर्या सहैव पदार्थानुसमये
ननाममंत्राभ्यां वा तयोः पूजनं। ततो मध्यमकुंभं स्पृष्ट्वा आचार्योऽष्टसहस्रं अष्टशतं गायत्रीं जप्त्वा श्री
सूक्तं जपेत्। हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्दमानंद चिक्लीतेंदिरासुता ऋषयः श्रीर्देवता
आद्यास्तिस्रोनुष्टुभः। तत एका प्रस्तारपंक्तिः ततो द्वे त्रिष्टुभौ ततोष्टावनुष्टुभोंत्या प्रस्तारपंक्तिः॥
जपे वि॰ ॐ हिरण्यवर्णामिति सूक्तं तत एकोनृत्विक् दक्षिणकुंभे रुद्रसूक्तानि जपेत्॥ यथा कद्रु
द्रायेति नवर्चस्य घोरः कण्वो रुद्रो गायत्री जपे वि॰ कद्रुद्रायेति सूक्तं इमा रुद्रत्व स इत्येकादशर्चस्य

सं·कौ सूक्तस्यकुत्सोरुद्र आद्यानवजगत्योंतेद्वेत्रिष्टुभौजपे इमारुद्रायमतिसूक्तं।आतेपितरिपंचदशर्चस्यसूक्त
२९ स्यगृत्समदोरुद्रस्त्रिष्टुप्जपे॰ ॐ आतेपितर्मरुतांसुम्नमेतुइतिसूक्तं।इमारुद्रायेतितिसृणांवसिष्ठोरुद्र
स्तिस्रोजगत्योंत्यात्रिष्टुप्जपे॰ इमारुद्रायस्थिर॰ आनोराजानंवामदेवोरुद्रस्त्रिष्टुप्जपे॰ आनोराजा॰ ऋक्
तमुष्टुहिसौमोत्रिरुद्रस्त्रिष्टुप्जपे॰ तमुष्टुहियःस्विषुः ऋक् भुवनस्यपितरंऋजिश्वारुद्रस्त्रिष्टुप्जपे॰
भुवनस्यपितरं ऋक् त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्जपे॰ त्र्यंबकं ऋक् अन्यऋक्त्रिगुत्तरकलशंस्पृशन् एका
दशावृत्तिभीरुद्रंजपेत्।ततः शंनइतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप्जपे॰ शंनइंद्रा
ग्नीइतिसूक्तं ३ मध्यमकुंभपश्चिमेस्थंडिलेअग्निस्थापनाग्निध्यानेकृतेस्थापितेकुंभेशान्त्यांवैद्यादो
नवग्रहाणांतदंगदेवतानांचतत्तन्मंत्रैरावाहनंकुर्यात्॥ सौकार्यार्थंग्रहपीठग्रहश्लोकोलिख्यते पं
चास्त्रेकर्णिकाबिंदुमत्रचतुरस्त्रेंगारकंत्र्यस्त्रगेराहुंशूर्पानिभेधनुष्यथशनिंकेतुंध्वजाभतया।दीर्घ

कोष्ठचतुष्टयेसुरगुरुंबाणोपमेचंद्रजंप्राचीतःक्रमतोलिखेद्ग्रहगणंमध्येरविंवर्तुलंइति।शुक्रार्कौप्रा
ङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ।प्रत्यङ्मुखःशनिःसोमःशेषादक्षिणतोमुखाइति।मत्स्यपुराणे॥
आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताःस्थापनीयामुनिश्रेष्ठनोत्तरेणापराङ्मुखइतिमहार्णवे।त
द्यथाप्रणवस्यपरब्रह्मऋषिःपरमात्मादेवतागायत्रीछंदःव्याहृतीनांक्रमेणजमदग्निभरद्वाजभृग
वऋषयःअग्निर्वायुःसूर्योदेवतादैवीगायत्रीदैवीउष्णिक्दैवीबृहत्यःसूर्याद्यावाहने॰ तत्रग्रहपीठ
स्यवर्तुलेद्वादशांगुलेप्राङ्मुखंसूर्यंरक्ताक्षतपुष्पैः।आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्।सूर्यावा॰
ॐ आकृष्णेन॰ ॐ भूर्भुवःस्वःकलिंगदेशोद्भवकाश्यपसगोत्रसूर्यइहागच्छइहतिष्ठेतिस्थापयेत्
ततआग्नेयेचतुरस्त्रेचतुर्विंशांगुलेप्रत्यङ्मुखंसोमंश्वेतपुष्पाक्षतैःआप्यायस्वगोतमःसोमोगा
यत्री।सोमावाहने॰ ॐ आप्यायस्व॰ ऋक् ॐ भूर्भुवःस्वःयमुनातीरोद्भवआत्रेयसगोत्रसोमइहाग

छेहतिष्ठेत्यावाह्य इहतिष्ठ स्थापयेत॥ ततोदक्षिणेत्रिकोणेत्र्यंगुलमंडलेदक्षिणामुखंभौमंरक्ताक्षतपुष्पा
क्षतैः अग्निर्मूर्धाविरूपोंगारकोगायत्री। अंगारकंवाह॰ ॐ अग्निर्मूर्धा ऋ॰ ॐ भू॰ अवंतीसमुद्भवभार
द्वाजगोत्रभौमइहा॰ ३ ततईशान्येबाणाकारेचतुरंगुलेउदङ्मुखंबुधंपीतपुष्पाक्षतैः उद्बुध्यध्वंबुधः
सौम्योबुधस्त्रिष्टुप् बुधावा॰ ॐ उद्बुध्यध्वं ॐ भूर्भुवः मगधदेशोद्भवआत्रेयसगोत्रबुधइहा॰ ततः उत्तरेदी
र्घचतुरस्रेमंडलेउदङ्मुखंबृहस्पतिंपीतपुष्पाक्षतैः बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप् बृहस्पता॰
बृहस्पतेअतियदर्यः ॐ भू॰ सिंधुदेशोद्भवआंगिरसगोत्रबृहस्पतेइहागच्छ ५ ततः पूर्वेपंचकोणेनवां
गुलेमंडलेप्राङ्मुखंशुक्रंशुक्लपुष्पाक्षतैः शुक्रःपाराशरः शुक्रोद्विपदाविराट् शुक्रावा॰ ॐ शुक्रःशु॰
ॐ भूर्भुवः स्वः भोजकटदेशोद्भवभार्गवगोत्रशुक्रइहागच्छे॰ ६ ततः पश्चिमेधनुराकारेद्व्यंगुलेमं
डलेप्रत्यङ्मुखंशनिंकृष्णपुष्पाक्षतैः शमग्निरिरिंबिठिः शनिरुष्णिक् शन्यावाह॰ ॐ शम

ग्नि॰ ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भवकाश्यपगोत्रशनैश्चरइहा॰॥ ७॥ ततोनैर्ऋत्यमंडलेशूर्पाकारेद्वाद
शांगुलेदक्षिणाभिमुखंराहुंकृष्णपुष्पाक्षतैः कयानोवामदेवोराहुर्गायत्री राहावा॰ ॐ कयान॰ ॐ भू॰
राठिनापुरोद्भवपैठीनसिगोत्रराहोइहा॰ ततोवायव्येध्वजाकारेषडंगुलेमंडलेदक्षिणाभिमुखंधू
म्रपुष्पाक्षतैः केतुंमधुच्छंदाः केतुर्गायत्री। केत्वा॰ ॐ केतुंकृण्वन्न॰ ॐ भूर्भुवः स्वः। अंतर्वेदिसमुद्भव
जैमिनिसगोत्रकेतोइहागच्छ॰ यथोक्तकुसुमतंडुलाभावेयथालाभोपपन्नैः कुसुमतंडुलैः स्थाप
येत्॥ त्र्यंबकंवसिष्ठोरुद्रस्त्रिष्टुप् त्र्यंबकं॰ ॐ भूर्भुवः ईश्वरइहागच्छेहतिष्ठेति सूर्यदक्षिणपार्श्वेईश्वरं
गौरीर्मिमायायदीर्घतमाजगती ॐ गौरीर्मिमा॰ ॐ भू॰ उमेइहागच्छेत्यावाह्यइहतिष्ठेति सोमदक्षिण
पार्श्वेउमां यदक्रंदोदीर्घतमास्कंदस्त्रिष्टुप् यदक्रं॰ स्कंदइहागच्छेहतिष्ठेति भौमदक्षिणपार्श्वेस्कं
दं विष्णोर्नुकंदीर्घतमानारायणस्त्रिष्टुप् नाराय॰ ॐ विष्णोर्नुकं॰ ॐ भू॰ नारायणइहागच्छेत्या

सं·को· वाह्यइहतिष्ठेति बुधदक्षिणपार्श्वेनारायणं॰ ब्रह्मजज्ञानंवामदेवोब्रह्मात्रिष्टुप् ब्रह्मा॰ ॐ ब्रह्मज॰
२९ ॐ भूर्भुव॰ ॐ ब्रह्मणाते ब्रह्मयुजेत्यस्य विश्वामित्रोब्रह्मात्रिष्टुप् ब्रह्मन्निहागछत्यावाह्यइहातिष्ठे
ति बृहस्पति दक्षिणपार्श्वेब्रह्माणं। इंद्रंवोमधुच्छंदाइंद्रोगायत्री इंद्रावा॰ इंद्रंवोवि॰ ॐ भूर्भु॰ इंद्रइह
गछइहतिष्ठेति शुक्रदक्षिणपार्श्वे इंद्रं। यमायसोमंयमोनुष्टुप् यमावा॰ यमायसो॰ ॐ भू॰ यमइह
गछेहतिष्ठइतिशनैश्चरदक्षिणपार्श्वे यमं। मोषुणोघोरःकण्वःकालोगायत्री कालावा॰ ॐ भू॰ ॐ
मोषुणःपरा॰ ॐ भू॰ कालइहागछेहतिष्ठेतिराहुदक्षिणपार्श्वे कालं उपोवाजप्रस्कण्वःश्चित्रगु
प्तोबृहती चित्रगुप्ता॰ उपोवा॰ ॐ भूर्भु॰ चित्रगुप्तइहागछेहतिष्ठेतिकेतुदक्षिणपार्श्वेचित्रगु
प्तं ततःशुक्लपुष्पाक्षतैः सर्वाःप्रत्यधिदेवताः स्थापयेत् अग्निंकाण्वोमेधातिथिरग्निर्गायत्री
अग्नेरा॰ ॐ अग्निंदू॰ ॐ भू॰ अग्नेइहागछेहतिष्ठेति सूर्यवामपार्श्वे अग्निंआवाहयामि अ

प्फमेमेधातिथिरापोनुष्टुप् अवावा॰ अप्फमे॰ ॐ भूर्भु॰ आपइहागछतइहतिष्ठतेति सोमवामपार्श्वे
आपः स्योनापृथिवीमेधातिथिर्भूमिर्गायत्री ॐ स्योना॰ ॐ भूमेइहागछेहतिष्ठेतिभौमवामपार्श्वे भूमिः
इदंविष्णुःकाण्वोविष्णुर्गायत्री ॐ भू इदंवि॰ ॐ भू॰ विष्णो इहागछेहतिष्ठेतिबुधवामपार्श्वेविष्णुः इदंवि
ष्णु॰ इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप् इंद्रश्रे॰ इंद्रावा ॐ भू॰ इंद्रइहागछेहतिष्ठेतिगुरुवामपार्श्वेइंद्रं इं
द्राणी वृषाकपिरिंद्राणीपंक्तिः इंद्राणीमासु॰ ॐ भू॰ इंद्राणीइहागछेहतिष्ठेति भृगुवामपार्श्वेइंद्राणीं
प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापते॰ ॐ भूर्भु॰ प्रजापतइहागछेहतिष्ठेति शनिवाम
पार्श्वेप्रजापतिं आयंगोःसार्पराज्ञी सर्पागायत्री सर्पा॰ आयंगोः ॐ भू॰ सर्पाःइहागछतइहतिष्ठ
तेतिराहुवामपार्श्वेसर्पान् ब्रह्मजज्ञानंवामदेवोब्रह्मात्रिष्टुप् ब्रह्मा॰ ब्रह्मजज्ञा॰ ॐ भू॰ ब्रह्मन्निह
गछेहतिष्ठेति केतोवामपार्श्वेब्रह्माणं ततःशुक्लाक्षतपुष्पैर्विनायकादिपंचदेवताः स्थापयेत्॥

गणानांत्वागृत्समदोगणपतिर्जगती विनायका· गणानांत्वा· ॐ भूः विनायकइहागच्छेहतिष्ठेतिराहोरु
त्तरतोविनायकं जातवेदसेकश्यपोदुर्गात्रिष्टुप् दुर्गावा· जातवेद· ॐ भूः स्वः दुर्गे इहागच्छेहतिष्ठेतिश्शाने
रुत्तरतोदुर्गां तववायोव्यश्वआंगिरसोवायुर्गायत्री तववाय· ॐ भूः वायोइहागच्छेहतिष्ठेतिरवेरुत्तर
तोवायुं। आदिद्रत्स आकाशोगायत्री आदित्प्रत्न· ॐ भूः आकाशइहागच्छेहतिष्ठेतिराहोर्दक्षिणेआ
काशं उषाःप्रस्कण्वोश्विनोगायत्री एषोउषा· ॐ भूः अश्विनौइहागच्छतइहतिष्ठतमितिकेतोर्दक्षि
णेश्विनौ। यद्वाविनायकादीन्पंचउत्तरएववस्थापयेत्॥ ततोग्रहपीठाद्यंगतयावक्ष्यमाणादेवताःस्था
पयेत् उत्तरेक्षेत्राधिपतिंवास्तोष्पतिंआवाहयेदित्येके क्षेत्रस्यवामदेवःक्षेत्राधिपतिरनुष्टुप् क्षेत्र
स्य· ॐ भूः क्षेत्राधिपतइहागच्छेहतिष्ठेतिक्षेत्राधिपतिं वास्तोष्पतेवास्तोष्पतिस्त्रिष्टुप् वास्तोष्प
ते· वास्तोष्पतेइहागच्छेहतिष्ठेति वास्तोष्पतिं ततःइंद्रादिलोकपालान्सूर्याभिमुखानावाहयेत्।

तत्रमंत्राः इंद्रं विश्वाजेतामधुछंद इंद्रोनुष्टुप् ॐ इंद्रंविश्वाअ· ॐ भूः इंद्रइहागच्छेत्यादिपूर्ववत् एवमु
त्तरत्रापि अग्निंकाण्वोमेधातिथिरग्निर्गायत्री ॐ अग्निंदूतं· यमायसोमंयमोयमोनुष्टुप् यमायसो·
मोपुणोघोरःकण्वोनिर्ऋतिर्गायत्री तत्त्वायामिशुनःशेपोवरुणस्त्रिष्टुप्· तववायोव्यश्वआंगिरसो
वायुर्गायत्री सोमोधेनुंगोतमःसोमस्त्रिष्टुप् सोमोधेनुं· तमीशानंगोत
मइंद्रोजगती तमीशानं· एवमीशानांतादेवताआवाह्यतदस्त्कमित्रावरुणा· गृहावैप्रतिष्ठासूक्तमि
तिप्रतिष्ठाप्य उक्ततत्तन्मंत्रैराद्दित्यानांयनमइत्येवमादिभिर्नाममंत्रैर्वाषोडशोपचारैःसंपूज्य। मं
त्रहीनंक्रियाहीनमितिक्षमाप्य ग्रहवेदीशानभागे मह्यीद्यौःपृथिवीचनइत्यादिभिर्विधिनाकलश
स्थापनंकृत्वातंदुपरितत्त्वायामिवरुणंसंपूज्य तत्रकलशेसमुद्रनद्याद्यावाहनंकुर्यात् सर्वेसमुद्राः
सरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः ततः कलशाभिमंत्रणंक

लशास्यमुखे॰ समाश्रितः ततः कलशप्रार्थना। देवदानवसंवादे मथ्यमाने महोदधौ॥ उत्पन्नोसि तदा कुंभ
विधृतो विष्णुना स्वयं॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्र
तिष्ठिताः॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्व
यि तिष्ठंति सर्वेपि यतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥ सान्निध्यं कुरु देवेश
प्रसन्नो भव सर्वदा॥ ततः आचार्यो न्वाधानं कुर्यात् तत्र प्रधानकीर्तने विशेषः॥ सूर्यं सोमं भौमं बुधं
बृहस्पतिं शुक्रं शनिं राहुं केतुं एताः देवताः एतत्संख्याभिः अर्कादिजातीयसमिदाज्याहुतिभिः ताव
ती भिश्चर्वाहुतिभिराज्याहुतिभिश्च एतदित्येतत्स्थाने अष्टोत्तरशतं अष्टाविंशतिं वा कीर्तयेत्॥ ई
श्वरमुमां स्कंदं नारायणं ब्रह्माणं इंद्रं यमं कालं चित्रगुप्तमग्निमपो भूमिं विष्णुमिंद्रमिंद्राणीं प्रजाप
तिं सर्पान् ब्रह्माणमेताः देवताः तत्तत्संख्याकाभिः समिदाज्याहुतिभिः अत्र एतदित्यस्य स्थाने पू

र्वसंख्या न्यूना अष्टाविंशतिसंख्यामष्टसंख्यां च कीर्तयेत्॥ विनायकं दुर्गां वायुं आकाशं अश्विनौ
वास्तोष्पतिं क्षेत्रपालमिंद्रमग्निं यमं नैरृतिं वरुणं वायुं सोममीशानमेता देवताः एतत्संख्याकाभिः
समिदाज्याहुतिभिः एतदित्यस्य स्थाने अष्टसंख्यां चतुःसंख्यां वा कीर्तयेत् भुवनेश्वरी अष्टोत्तरस
हस्रसंख्याकाभिर्दूर्वाहुतिभिः तिलमिश्रगोधूमाहुतिभिः पयसाहुतिभिराज्याहुतिभिश्च तावती
नाम संभवे अष्टोत्तरशतं वा। भुवनेश्वरीमित्येतत्स्थाने सवितारमिति वा। इंद्राणीमिंद्रं च एतत्संख्या
भिर्दूर्वादिचतुर्विधाहुतिभिः। अत्रादित्यस्य स्थाने पूर्वसंख्यां कीर्तयेत्॥ देवताक्रममुद्दिश्य मनान्वाधा
नं वा। शेषेण स्विष्टकृदादि॰ ततः पात्रासादनकाले स्थाली द्वयं प्रोक्षणी दर्वि स्रुक्स्रुवमित्यादि। युगपद
नेककर्तृकाज्यहोमप्रसक्तौ अनेकस्रुक्स्रुवासादनं कार्यं। निर्वापकाले भुवनेश्वर्यादिदेवतात्रयमुद्दि
श्य तूष्णीं निर्वापप्रोक्षणे॥ तत आज्यसंस्कारः। आज्येन सरूपाय सादिहविस्त्रमस्य ग्रहहोमार्थे ग्र

सं॰र॰ ३२ हैं कर्तव्यामंत्रवेतश्चरवः प्रतिदैवतमितिप्राजकल्पवचनात् ग्रहार्थं ग्रहसिद्धान्नचरुर्ग्राह्य इति के
वलंग्रहपाकादोदनमुद्धृत्यग्रहानुद्दिश्यजुहुति तत्रशिष्टाचारएवप्रमाणमितिमहार्णवे।तत्रायंप्रयोगः
सूर्यत्वामुष्टिंचतुरामीतिचतुरोमुष्टीन्निरूप्यैवसोमायमंगलायत्वेत्यादिकारेणग्रहेभ्यश्चतुरोमुष्टीन्नि
रूप्यइतरासांदेवतानांकृतेदेवेभ्योजुष्टंनिर्वपामीतिचतुरोमुष्टीन्निर्वपेत् इत्यत्रैवेतिनिर्वपेतत्रैवेति
दिक् ग्रहसिद्धान्नस्यचपर्यग्निकरणं दर्वीस्रुगमार्जनांतेग्रहसिद्धान्नमासादिबर्हिष्यासादनांतंकुर्या
त्।अर्कादिसमिधःदूर्वातिलमिश्रगोधूमांश्चतत्रैवआसाद्य अग्न्यर्चनादिआज्यभागांते यजमानोन्वा
धानानुसारेणएतत्संख्याकाहुतिभिःपर्याप्तंअर्कादिजातीयसमिच्चर्वाज्यात्मकंहविस्त्रयंसूर्यायसोमा
यनममत्येवंत्यागपूर्वकंतदंगदेवताभ्योपित्यक्ताएतत्संख्याकाहुतिपर्याप्तंदूर्वादिहविश्चतुष्टयं
भुवनेश्वर्यैनममेतित्यजेत्॥ततइंद्राण्यैरुद्रायेतिचभुवनेश्वर्यादृत्यस्यस्थानेसवित्रइतिवा।

इंद्राणींद्रयोर्होमाभावपक्षेनतदुद्देश्यकत्यागः॥एवंत्यागंकृतेसर्त्विगाचार्योर्कादिसमिधोदधिमध्वक्ताः
चर्वाहुतीराज्याहुतीश्चकल्पानुसारिसंख्याकाजुहुयात्॥तावत्संख्याएवदूर्वादिहविश्चतुष्टयाहुतीर्जु
हुयात्॥तत्रदधिमधुघृताक्ताभिस्तिस्रोभिर्दूर्वाभिरेकैकाहुतिःकार्या॥तन्न्यूनसंकल्पानुसारिसंख्याच
तुर्विधाहुती।रिंद्राणींद्रमंत्राभ्यांतद्धोमपक्षेकृत्वास्विष्टकृदादिप्रायश्चित्तहोमांतंकृत्वादिक्पालादिभ्यःस
दीपमाषभक्तबलिंसंकल्प्ययजमानद्वाराकारयेत्॥सपत्नीकोयजमानःप्रतिबलिसंकल्पमक्षतजलंत्यजे
त्।तद्यथा॥अग्न्यायतनस्यसमंतात्दिक्षुमाषभक्तबलिंदिग्पालेभ्योदद्यात्।त्रातारमिंद्रगर्गइंद्रस्त्रिष्टु
प् इंद्रप्रीत्यर्थे॰त्रातारमिंद्र॰इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायएषमाषभक्तबलि
र्नमम॥भोइंद्रदिशांरक्षबलिंभुंक्ष्वममयजमानस्यसकुटुंबस्यायुःकर्ताशांतिकर्तातुष्टिकर्तापु
ष्टिकर्ताभवेतिपुष्पाक्षतजलानिपूर्वाभिमुखस्त्यजेत्॥अग्निःकाण्वोमेधातिथिरग्निर्गायत्री॥

सं॰ कौ॰ अग्निश्री त्यर्थे॰ अग्निं दूतं॰ अग्नये यमाय सोमं यमो यमो नुष्टुप् यमाय सो॰ यमाय मोषु णो घोरः कण्वो
३३ निर्ऋतिर्गायत्री मोषुणः परा॰ निर्ऋतये तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप् तत्वायामि॰ वरुणाय॰ तववा
यो व्यश्व आंगिरसो वायुर्गायत्री तववाय॰ वायवे सोमो धेनुं गोतमः सोमः पंक्तिस्त्रिष्टुप् सोमो धेनुं सोमाय॰
तमीशानं गोतम ईशानो जगती॥ तमीशानं॰ ईशानाय॰ ततो ग्रह बलयो देयाः। तत्र पूर्वे आकृष्णेनहिर
ण्यस्तूपः सविता त्रिष्टुप् आकृष्णेन॰ आदित्याय सांगाय सपरिवाराय ईश्वराग्निरूपाधिदेवता प्रत्यधिदे
वतासहिताय इमं सदीपं माष भक्तबलिं समर्पयामीति पुष्पांजलिं क्षिपेत्॥ भो आदित्य इमं बलिं गृहा
ण मम यजमानस्य आप्यायस्व गोतमः सोमो गायत्री आप्याय॰ सोमाय उमा रूपाधिदेवता प्रत्यधिदे
वता सहितायेत्यादि। अग्निर्मूर्धा विरूपोंगारको गायत्री अग्निर्मूर्धा॰ भौमाय स्कंद भूमि रूपाधि ३३
देवता प्रत्यधिदेवता सहितायेत्यादि उद्बुध्यध्वं बुधः सौम्यो बुधः त्रिष्टुप् उद्बुध्यध्वं बुधाय ना

रायणाय विष्णु रूपाधिदेवता सहितायेत्यादि बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप् बृहस्पते॰ बृहस्प
तये ब्रह्मेंद्र रूपाधिदेवता सहितायेत्यादि शुक्रः पाराशरः शुक्रो द्विपदा विराट् शुक्रः शुशु॰ शुक्रायेंद्रेंद्राणी
रूपाधिदेवता सहितायेत्यादि शमग्निरिरिंबिठिः शनिः कालिक शमग्नि॰ शनैश्चराय यम प्रजापति रूपाधि
देवता सहितायेत्यादि कया नो वामदेवो राहुर्गायत्री कया न॰ राहवे काल सर्प रूपाधिदेवता प्रत्यधिदेवता सहि
तायेत्यादि गणानां त्वा गृत्समदो गणपतिर्जगती गणानां त्वा॰ गणपतये सांगाय सपरिवाराय ऋद्धि बुद्धि
सहितायेत्यादि जातवेदसे कश्यपो दुर्गा त्रिष्टुप् जातवेद॰ दुर्गायै सांगायै सपरिवारायै इमं बलिं भो दुर्गे मम
यजमानस्य आयुः कर्त्री क्षेमकर्त्री शांतिकर्त्री पुष्टिकर्त्री तुष्टिकर्त्री ऋद्धिकर्त्री भव। तववायो व्यश्व आं
गिरसो वायुर्गायत्री तववा॰ वायवे इत्यादि। आदित्प्रत्नस्य आकाशो गायत्री आदित्प्रत्न॰ आकाशायेत्यादि एषो
उषाः प्रस्कण्व अश्विनौ गायत्री एषोउषा॰ अश्विभ्यां सांगाभ्यां सपरिवाराभ्यां सायुधाभ्यां सशक्ति

सं॰ भ॰ काभ्यांएषमाषभक्तिर्बलिर्नमम भोअश्विनौ भोग गृहीतं। आयुः कर्तारोभवत। वास्तोष्पते वसिष्ठोवास्तो।
३४ ष्पतिस्त्रिष्टुप् वास्तोष्पत इत्यादि तभोगायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री। सविता गायत्री तिवा भुवने
श्वरी इत्यादिसवित्र इत्यादिवा ततइंद्राणी इमंत्राभ्यां क्रमेण तदुभयोद्देशेन बलिं दत्वा क्षेत्रपालायबलिं द
द्यात्॥ क्षेत्रस्यवामदेवः क्षेत्रपालोनुष्टुप् क्षेत्रस्यपतिना क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनी
वेतालपरिवारयुताय इमामित्यादि। ततः शुद्धादिना तद्बलिनयने कृते शांता पृथिवी। तिसृषुं प्रोक्ष्य सयजमा
नआचार्यः प्रक्षालितपाणिपाद आचांतः स्रुचि द्वादशगृहीतं चतुर्गृहीतं वा आज्यमादाय तदुपरि स्रु
सुतंचंदनादिभूषितफलं निधाय यजमानतद्मात्यान्वारब्धस्तिष्ठन्पूर्णाहुतिं जुहुयात्। समुद्रादूर्मिरि
ति सूक्तस्य गोतमोवामदेवोग्निस्त्रिष्टुप् पूर्णाहुति॰ समुद्रादूर्मि॰ सूक्तांते स्वाहा अग्नयेदं ततः पूर्णपा
त्रनिनयनं कृत्वा साचार्यो यजमानः संस्थापयज्ञोपस्थाय परिस्तरणविमोकादि पर्युक्षणांतं कु

र्यात्॥ ततोधृतनवकंचुकीवस्त्रया वामभागस्थया पत्न्यासहितं प्राङ्मुखं यजमानसकृत्तिगुदङ्मुखं आचा
र्यः स्थापितकलशाच्चतुष्टयाद्भिः पात्रांतरे गृहीताभिः तत्रत्यपंचपल्लवैः सकुशादूर्वैरभिषिंचेत्। आपोहिष्ठेति नव
र्चस्यांबरीषः सिंधुद्वीप आपो गायत्र्यो द्वे अनुष्टुभौ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अभिषेके॰ ॐ आपोहि॰
इंद्रोअंगेति गृत्सतस्य गृत्समद इंद्रो गायत्री अभि॰ इंद्रोअंग॰ ३ त्रिभिष्टुं देवेति सप्तर्चस्य सूक्तस्य वसिष्ठ ऋ
षिः आद्यानां तिसृणामग्निश्च वरुणो विश्वेदेवा आद्या गायत्री द्वितीयानुष्टुप् तिस्रो गायत्र्यो अंत्ये द्वे अनुष्टु
भौ अभि॰ त्रिभिष्टुं दे॰ सर्पिर्मधूदकं त्वमग्ने यं भ्रूणवत्रेनेति भर्ग इंद्रो बृहती उभयं शृ॰ स्रुक् स्वस्तिदाविशा
भारद्वाजः शास इंद्रोनुष्टुप् स्वस्तिदावि॰ करः त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् त्र्यंबकं जातवेदसे कश्यपो दुर्गा त्रि
ष्टुप् जातवेदसे समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप् त्रायंतामिति तिसृणां वसिष्ठ ऋषय आपो
नुष्टुप् समुद्रज्ये॰ ८ त्रायंतामि॰ ३ इमा आप इति तिसृणां सप्तर्षय आपोनुष्टुप् अभिषे॰ इमा आपः शि॰

सं॰ का देवस्यत्वा॰ हस्ताभ्यां॰ सरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामि अश्विनोर्भैषज्येनतेजसेब्रह्मवर्च
३५ सायाभिषिंचामि देवस्यत्वा इंद्रियस्येंद्रियेणश्रियैयशसेबलायाभि॰ तमीशानगौतमईशानोजगती अ
भिषेके॰ भुवनस्यपि॰ यातेरुद्रइतिकश्यपोरुद्रः स्वरानुष्टुप् यातेरुद्र॰ यज्जाग्रतइतिषण्णांप्रजापतिर्मनस्त्रि
ष्टुप् अभि॰ यज्जाग्रतो॰ येनकर्मा॰ यत्प्रज्ञान॰ येनेदं॰ यस्मिन्नृचः॰ सुषारथि॰ शिवसंकल्पमस्तु इंद्रत्वावृषभमि
तिपंचानांविश्वामित्रइंद्रोगायत्री इंद्रत्वावृ॰ सुरास्त्वामभिषिंचंत्वित्यादिपुराणमंत्रः सुरास्त्वामभिषिंचंतु
ब्रह्मविष्णुमहेश्वराः॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः १ प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयाय
ते॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा २ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ ब्रह्मणास
हिताःसर्वेदिक्पालाःपांतुतेसदा ३ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥ बुद्धिर्लज्जावपुःशां ३५
तिः कांतिस्तुष्टिश्चमातरः ४ एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥ आदित्यश्चंद्रमाभौमोबुधजीव

सितार्कजाः ५ ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ ६ ऋषयोमन
वोगावोदेवमातरएवच॥ देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः॥ ७ अस्त्राणिसर्वशस्त्राणिराजानोवाह
नानिच॥ औषधानिचरत्नानिकालस्यावयवाश्चये। सरितःसागराःशैलास्तीर्थानिजलदानदाः॥ एतेत्वाम
भिषिंचंतुसर्वकामार्थसिद्धये॥ तदुंयोरा॰ ततःकलशोदकेनान्येनचजलेनतैलाभ्यंगसर्वौषध्यनुलेपनपूर्व
कंस्नातोदंपती अभिषेककालीनवासांसिपरित्यज्य अहतशुक्लवासांसिपरिधायश्वेतचंदनपुष्पधार
णंकुर्यातां॥ त्यक्तवासांस्याचार्यस्य अग्नेःपश्चादुपविशतःदक्षिणतःपत्नी। ततोविभूतिधारणंकृत्वाचार्या
दीनांचरणक्षालनगंधाक्षतैःपूजनंकृत्वाचार्यायधेनुंदद्यात् तदभावेउक्तनिष्क्रयं रुद्रजापिनेऽनड्वाहंसद
क्षिणंउक्तनिष्क्रयंवा। ऋत्विग्भ्यायथाशक्तिहेमतन्निष्क्रयंवादद्यात्॥ ततोष्कवनेश्वर्यादीनांवरुणस्यचा
चार्येणोत्तरपूजनेकृतेतद्धस्तेनैवोत्तिष्ठब्रह्मणस्पतइत्यादिविसर्जनेजातेसोपस्करप्रतिमाःतद्धस्तेप्र

सं॰ कौ तिपाद्याग्निपूजनांते गच्छेत्यग्निं विसृज्य कर्मांगदेवताप्रीत्यर्थं ब्राह्मणभोजनसंकल्प पायसीं दक्षिणां च संकल्प
३६ शांतिसूक्तपाठं कारयित्वा कर्म पूर्णमस्त्विति वाचयित्वा परमेश्वरार्पणं कुर्यात्   इति श्रीमदनंतदेवीये संस्कारकौ
स्तुभे रजोदर्शनशांतिः   अयं शांतिकोक्तप्रकारो बह्वृचानां अन्येषां प्रकारांतरं मदनरत्ने ऋषिपुत्रसंहितायां।
प्रथमार्तवदोषाणां शांतिं कुर्यादनंतरं। तिथिनक्षत्रवारादिदेवानां पूजनं पृथक्। शांतिस्थलं प्रकुर्वीत विधिना
दैवनिर्मिते॥ उद्याने वा नदीतीरे तडागे वाथ चत्वरे। मंडलं कारयेत्तत्र गोमयेन द्विहस्तकं। स्थंडिलं कारयेत्त
त्र चतुराढकशालिभिः॥ आढकं तंडुलं चैव आढकौ तिलयावकौ युपर्युपरि संस्तीर्णं तन्मध्ये नलिनं लिखेत्
दर्भैराढ्यां घृतन्मध्ये कर्णिकायां न्यसेद्घटं॥ ससूत्रं सपिधानं च सकूर्चं वस्त्रवेष्टितं॥ पुण्योदकेन संपूर्णमोष
धादिसमन्वितं॥ सहदेवी च पत्री विष्णुक्रांता सभद्रिका॥ बिल्वपत्रसहेता निचूर्णयेत्तान्न्यसेद्घटे॥ कुष्टमां
सी हरिद्रे द्वे मुरा शैलेयचंदनं॥ वचा चोरमुस्ताख्याः सर्वौषध्यः प्रकीर्तिताः। गजाश्वरथ्यावल्मीकसंगमाद्ध

दगोकुलात्॥ राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत्॥ पंचगव्यं च कुमुदं तथा शक्रफलानि च॥ वज्रं वैडूर्यमाणिक्य
विद्रुमानि विनिक्षिपेत्॥ एवं कुंभं समासाद्य गंधपुष्पादिभिः शुभैः॥ अनुष्ठानपरो विप्रः प्राङ्मुखो वाप्युदङ्मुखः॥
आसीनः कृतसन्नात्मा प्राणसंयमनान्वितः॥ सावित्रीं च जपेत्कुंभं स्पृशन्दशशतं द्विजः॥ एवं प्रदोषकाले तु कार
येदपरेहनि॥ उदये समनुप्राप्ते स्नातां गंधाद्यलंकृतां॥ स्नापयेच्छांतिमन्विच्छन्पूर्वोक्तप्राङ्मुखां स्थितां॥ अधिवा
सितकुंभस्य तोयैश्चापि समंत्रकं पश्चाच्छेषोदकेन स्नात्वा देवं प्रणम्य च॥ स्वगृह्योक्तविधानेन होमं कुर्यात्प्रयत
तः॥ दूर्वाज्येन तिलैर्हुत्वा सावित्र्या चैव मंत्रतः॥ अष्टोत्तरसहस्रं वा शतमष्टाधिकं तथा॥ तत्संख्यां त्रिविधां हुत्वा
दूर्वाज्येन तिलैः समं॥ ब्राह्मणान्भोजयित्वा तु देवज्ञं पूजयेत्ततः॥ अनेन विधिना नारी सर्वदोषात्प्रमुच्यते इ
ति। अनंतरं चतुर्थदिवसे। यदा तिथ्यादीनां प्रशस्ता बहवो दुष्टाश्चाल्पाश्च तु चतुर्थदिवसे शांतिकर्म विधाय प्र
शस्तकाले संगमं कुर्यादित्युपन्यस्य मदनरत्ने उक्तशांत्युपन्यासात्॥ पृथक्प्रशांतः पूर्वं देवनिर्मिते अत्र

त्रिमे॥ तडागेतत्समीपेउक्तपरिमाणे अवतुभिर्द्र्येकपर्युपरि संस्तीर्णं स्थंडिलं कृत्वा मध्ये कमलं लिखेत्॥ शुभ्रेरि
त्यंते अर्चयेत्कुंभे वरुणमिति शेषः। जपार्थं ब्राह्मणवरणं सूचयन्नाह अनुष्ठानेति स्नापयेत्स एव ब्राह्मणः। यजमा
नं अत्याह स्नात्वेति देवं वरुणं होमे सविता देवता इति श्रीमदनंतदेवीये संस्कारकौस्तुभे मदनरत्नोक्तारजोद
र्शनशांतिः॥ अथ बोधायनोक्तारजोदर्शनशांतिः ऋतुशांतिं व्याख्यास्यामः तिथिवारनक्षत्रलग्नदोषशां
त्यर्थं चतुर्थेऽह्नि पंचमेऽह्नि वा शांतिं स्नानं प्रकुर्वीत देवालये गृहे प्रस्थाष्टभिर्धान्यैस्तदर्धैस्तंडुलैस्तदर्धैस्तिलैश्चार
त्निमात्रं चतुरस्रं कृत्वा मध्यमालिनमुल्लिख्य कुशैर्दूर्वाभिः प्रतिष्ठाप्य तस्मिंस्तंतुवेष्टितं कुंभं निधायापोऽह्नि
बादृदं। ॐ सर्वा मित्येतेनानुवाकेनाभिलिंगैः शांतिकुंभमुदकैः पूरयित्वा कूर्चमंतर्धाय पंचपल्लवान् पंचरत्नपंच
निक्षिप्य कपित्थाश्वत्थपलाशप्लक्षबिल्वोदुंबरं च नवरत्नं च निक्षिप्य नववस्त्रयुग्मेनाच्छाद्य नारिकेलफले ३७
नापिधाय बिल्वपल्लवैश्चावकीर्य पुरुषं पुंडरीकाक्षं ध्यात्वा गंधधूपदीपैः उदकुंभमभ्यर्च्याथ श्रोत्रियां

श्चवकुश्रुतान् षड्स्त्रचतुरो वा ब्राह्मणान्वरणपूर्वमभ्यर्च्याचार्यं च तत्कुंभमन्वारभ्य वेदवीं गायत्रीं सहस्राष्टकेश
ताष्टकं वा तदंगं गां गायत्रीं च वेदादीनापोहिष्ठामयो भुव इति तिस्रो हिरण्यवर्णाः शुचयः पावका इत्येतमनुवाकं पव
मानः सुवर्चन इत्येतमनुवाकं पुरुषसूक्त इत्येतमनुवाकं त्वं प्राची मित्येतमनुवाकमथालंकृतां पत्नीं सुरुविष्टरेत
णा आसीनामापोहिष्ठा मयो भुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जनमित्ये
तेनानुवाकेन प्रत्यृचमाशीर्वादैः पुरः सरं स्नापयेयुस्ततो नारीं पंचगव्यं प्राशयित्वा। यत्त्वगस्थिगतं पापं देहेति
ष्ठति मामके॥ प्राशनात्पंचगव्यस्य दहत्यग्निरिवेंधनमिति। शुचौ समे देशे स्थंडिलं कल्पयित्वा लौकिकाग्निं
प्रतिष्ठाप्य स्वगृह्योक्तविधानेनाग्निमुखं कृत्वा विष्णुसूक्तेन शताष्टकसंख्याः पलाशसमिधो हुत्वैवं ब्रह्म
सूक्तेनान्नं रुद्रसूक्तेनान्नं रुद्रसूक्तेनाज्यं तेषामष्टादशं कृत्वायुष्यहोमो घृतसूक्तेनाज्येन हुत्वा ततो न
क्षत्रहोमं तत्तन्मंत्रेण चतुर्दशाहुतीः पूर्ववत्समिदन्नाज्यैस्त्र्यंबकं यजामह इति तिलहोमं शताष्टकाहुतीरूप

जुहुयात् स्विष्टकृतप्रभृति सिद्धमाधेनुवरप्रदानादथ दक्षिणां दद्यादाचार्याय विशेषतः॥ ततः पुण्याहवाचनं कु
र्यात्ततो नारी दोषात्प्रमुच्यते त्याभगवान् बोधायनः॥ विष्णुसूक्तं विष्णोर्नुकं तदस्य प्रियं प्रतद्विष्णुः परोमात्रया।
विचक्रमे त्रिर्देवइति। ब्रह्मसूक्तं ब्रह्मजज्ञानमिति षट्कं॥ रुद्रसूक्तं॥ परिणो रुद्रस्य हेतिः स्तुहिश्रुतमिति। मी
ढुष्टम। अर्हन्बिभर्षि त्वमग्ने रुद्रो। आवो राजानमिति षट्कं च शतमष्टकं च शताष्टकं अष्टोत्तरशतमित्यर्थः। एत
त्पुराणार्थमेवैकैकस्य षडृचं स्यादष्टादशावृत्तयो विधीयंते। घृतसूक्तं॥ यो ब्रह्मा ब्रह्मणउज्जभार प्राणैरीश्व
रः कृत्तिवासाः पिनाकी॥ ईशानो देवः सन आयुर्दधातु तस्मै जुहोमि हविषा घृतेन स्वाहा॥ इदं ब्रह्मणे। वि
भ्राजमानः परि रस्य मध्यो द्विरोचमानो धर्मनु चिर्यआगात्॥ स मृत्युपाशादपनुद्य घोरादिहायुषेणो घृत
मत्तु देवः स्वाहा इदं देवाय ब्रह्मज्यो। तिर्ब्रह्म पत्नीषु गर्भं यमादधात्पुरुरूपं जयंतं सुवर्णरंभं ग्रहमर्कमर्चंतमा
युषा वर्धयामो घृतेन स्वाहा इदं अर्काय श्रियंलक्ष्मी मौपलामंबिकां गां षष्ठीं जयामिंद्रसेनेत्युदाहुः॥ तां

विद्यां ब्रह्मयोनिं सरूपामिहायुषे तर्पयामो घृतेन स्वाहा॥ इदं विद्यायै। दाक्षायण्यः सर्वयोन्यः सयोन्यः सह
स्रशो विश्वरूपाः ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषंतां स्वाहा॥ इदं दाक्षायणीभ्यः। दिव्यागण
णा बहुरूपाः पुराणा आयुः श्छेदो नः प्रवधंतु वीरान्॥ तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजां रीरिषो मोत वी
रान्॥ स्वाहा॥ इदं दिव्यगणेभ्यः। एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवनं
सांपराये स नो हविर्घृतमिहायुषेत्तु देवः स्वाहा। इदं देवाय। वसून्रुद्रानादित्यान्मरुतोथ साध्यान्ऋभून्य
क्षान्गंधर्वांश्च पितॄंश्च विश्वान्॥ भृगून्सर्पांश्चांगिरसोथ सर्वान् घृतं हुत्वा स्वायुष्या महयाम शश्वत्स्वा
हा॥ इदं वस्वादिभ्यः॥ इति घृतसूक्तं इत्यनंतदेवीये संस्कारकौस्तुभे बोधायनोक्तप्रकारेण रजोदर्श
नशांतिः॥ अथ गर्भाधानं कश्यपः॥ षष्ठ्यष्टमी पंचदशीं चतुर्थीं चतुर्दशीमप्युभयत्र हित्वा॥ शेषाः
शुभाः स्युस्तिथयो निषेके वाराः शशांकार्यसितेंदुजानां॥ आर्यो गुरुः। सितः शुक्रः। इंदुजो बुधः

सं·स्का· वसिष्ठः। उपप्लवे वैधृतिपातयोश्च विष्ट्यां दिवा परिघपूर्वभागे। संध्यासु पर्वस्वपि मातृपित्रोर्मृते ह्नि पत्नी
३९ गमनं च वर्ज्यमिति। तस्मिन्नृतौ पर्वणाद्याश्चतस्रो रात्रीर्वर्जयित्वा युग्मासु समासु षष्ठीप्रभृतिषु गच्छे
त्पुत्रार्थी॥ अयुग्मासु स्त्री। जन्मभयादगमनं न तु प्रतिषेधात्॥ युग्मास्वपि रात्रीष्वेवोपगमनं नाह्नि तथा
चाथर्वणी श्रुतिः। प्राणं वा एते प्रस्कंदंति ये दिवा रत्या संयुज्यंते ब्रह्मचर्यमेव तद्यद्रात्रौ संयुज्यंत इति। शंखलि
खितावपि नार्तवो दिवा मैथुनं व्रजेदिति पर्ववर्जं व्रजेच्चैनां इति मनुः। पर्ववर्जमित्यनेन निषिद्ध इति तिथिनक्ष
त्राण्युपलक्ष्यंते। निषिद्धपर्वं चामावास्या पौर्णमासी च। तत्र स्त्रीगमनं श्रुत्वा निषिद्धं। नामावास्यायां पौर्ण
मास्यां च॥ स्त्रियमुपेयात् यद्युपेयान्निरिंद्रियः स्यादिति॥ चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा॥
पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च॥ तैलस्त्रीमांससंभोगी सर्वेष्वेतेषु वै पुमान्॥ विण्मूत्रभोजनं ना
मप्रयाति नरकं नपेति विष्णुपुराणे॥ एवं गच्छन्नृतौ स्त्रियं क्षामां मघां मूलं च वर्जयेदिति। क्षामां लघ्वाहा

रादिना कृशामित्यर्थः॥ अत एव बृहस्पतिः॥ स्त्रीपुंसयोराहारविशेषसन्निमित्तमाह॥ स्त्रियाः शुक्रोऽधिके स्त्री
स्यात् पुमान् पुंसोऽधिके भवेत्॥ तस्माच्छुक्रविवृद्ध्यर्थं स्निग्धं वृष्यं च भक्षयेत्॥ लघ्वाहारं स्त्रियं कुर्यादेवं संजन
येत्सुतमिति॥ यत्तु। षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत्॥ ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च
वर्जयेदित्यतद्वारवावसरमिताक्षराकारेणोक्तं॥ ऋतौ श्राद्धदिनेपि गच्छतो न ब्रह्मचर्यहानिरिति। तत्षोड
शादिनेषु तदितरकालासंभवविषयं॥ पारिजाते। विष्णुप्रजेशरविमित्रसमीरपौष्णमूलोत्तरावरुणभा
नि निषेककाले॥ पूज्यानि पुष्यवसुशीतकराश्विचित्रादित्याश्च मध्यमफला विफलाः स्युरन्य इति॥ वि
ष्णुः श्रवणः। प्रजेशो रोहिणी। रविर्हस्तः। मित्रोऽनुराधा। समीरः स्वाती। पौष्णं रेवती। उत्तरात्रयं। वरुणः श
तभिषक्॥ एतानि पूज्यानि वसुर्धनिष्ठा। शीतकरो मृगः। आदित्यः पुनर्वसुः। एतानि मध्यमानि। अन्या
नि विफलानीत्यर्थः। विष्णुपुराणे। ऋतावुपगमः शस्तः स्वपत्न्यामवनीपते। पुन्नामर्क्षे शुभे काले ज्ये

सं॰स्मृ॰ षयुग्मासु रात्रिषु इति। ज्येष्ठासु चान्यासु रात्रिषु। ज्येष्ठं चोत्तरोत्तरमलं ३ आश्वलायनः गर्भाधाने द्विजः कुर्या
५० दृतौ प्रथमएवाहि। चतुर्थदिवसादूर्ध्वं पुत्रार्थं दिवसे समे॥ क्रूरदारुणभं षोडकं द्स्याग्नीचर्द्धिदैवतं। आर्द्राहं नैव
रिक्तां च हित्वा न्यास्मिन्निधीयइतीति॥ यस्मिन्नेव भे कर्म स्त तस्माद्धट्टशामं भवेत्। तत्रापसंप्रजायेत तस्मादेत
त्रयं त्यजेत्॥ इति। त्रयं मघा रेवती ज्येष्ठाख्यानि॥ आपस्तंबः॥ चतुर्थप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां नि
श्रेयस संमुपदिशंति। चतुर्थ्यां रात्रौ विधिर्निवृत्तरजस्कायां। रात्रिविनिनिके वलमत्यायुः किंत्वदन्यदपि
तदुक्तं लैंगे। कदाचित्तु जीवति चेत् विवाहीनं व्रतां श्रेष्ठं पातित पारदायकं दारिद्र्यार्णवमग्नं चततनयं सा प्रसूयत इ
ति। चतुर्थ्यां रात्रौ तस्यां गम्यते सा एवं प्रसूयत इत्यर्थः॥ व्यासः। रात्रौ चतुर्थ्यां पुत्रं स्यादल्पायुर्धनवर्जितः
पंचम्यां पुत्रिणी नारी। षष्ठ्यां पुत्रस्तु मध्यमः। सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः सुतः। नवम्यां सुभगा
नारी दशम्यां चतुरः पुमान्॥ एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः॥ त्रयोदश्यां सुजाता तस्य वर्णसं

करकारिणी॥ धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः। प्रजायते च चतुर्दश्यां गुणौघैर्जगतीपतिः। राजपत्नी महाभा
गा राजवंशगता तथा। प्रजायते पंचदश्यां तु बहुपुत्रा पतिव्रता॥ विद्यालक्षणसंपूर्णः सत्यवादी जितेंद्रियः। आ
श्रयः सर्वभूतानां षोडश्यां जायते पुमानिति॥ आश्वलायनः॥ दीक्षितस्तु महायज्ञैः पित्रोः प्रागवत्सरा
द्द्विजः॥ नेयाद्भार्यां प्रयत्नेन कृतावप्यर्थितां बुधः॥ प्राग्रजो दर्शनात्पत्नीं नेयात्कृत्वा पतत्यधः। व्यर्थीकारेण
शुक्रस्य ब्रह्महत्यामवाप्नुयादिति। महाभारते॥ ऋतौ गच्छति यो भार्यामनृतौ नैव गच्छति॥ यावज्जीवं ब्र
ह्मचारी मुनिभिः परिकीर्तितः॥ तथा॥ ऋतुस्नातां तु यो भार्यां सन्निधौ नैव गच्छति। घोरायां भ्रूणहत्या
यां युज्यते नात्र संशयइति। अस्य वचनस्य जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान्जायते। यज्ञेन देवेभ्यः
प्रजया पितृभ्यो ब्रह्मचर्येण ऋषिभ्य इति श्रुतिमूलत्वेनोपपत्तेः॥ श्रुत्यंतरकल्पनाया अन्याय्यत्वा
दजातपुत्रं प्रत्येवायं नियमः॥ तथा च मनुः॥ ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः॥ पितृणामनृणः

सं.कौ. [illegible]तस्यासवर्णमर्हति॥यस्मिन्नृणांसन्नयतियेनचानंत्यमश्नुते॥सएवधर्मजःपुत्रःकामजानितरान्विदुः॥इ
४२ तिकेचित्॥अन्येतुजेतोनिर्मित्तत्वात्तन्निमित्तंनैमित्तिकावृत्तिर्विहिता॥स्मरंतिच॥एष्टव्याबहवःपुत्रा
यद्येकोपिगयांव्रजेदितिस्मृतेः॥व्यासः॥वृद्धांवंध्यामसद्वृत्तांमृतापत्यामपुष्पिणीं॥कन्यांस्तृबहुपु
त्रांचवर्जयेन्मुच्यतेभयादिति॥वृद्धासरजस्कापिगर्भधारणादावशक्तागतरजस्का॥अपुष्पिणीनित्य
स्यपौनरुक्त्यापत्तेः॥अस्यापवादः॥बोधायनसूत्रान्नियाधिपद्धतिकर्त्राविश्वकर्त्रोसेदेनोक्तः॥त्रिरा
त्रंव्रतंचरेदित्युपक्रम्यव्रतसमाप्तौअस्तमितेआदित्येअन्योन्यमलंकृत्यापआचम्यवाग्यतावभ्यांगच्छतइ
त्युक्तं॥व्रतमध्येपिसहशयनमुक्तंगोभिलेन॥एतत्प्रभृतित्रिरात्रमेकरात्रंवाक्षारालवणाशिनौब्रह्मचा
रिणौभूमौसहस्वपातामिति॥अस्मिन्सूत्रेशय्यैक्यायुर्वारमपिमैथुनंप्रयत्नतोवर्ज्यमितिब्रह्मचा
रिणाविनिवचनं॥एतत्प्रभृतिरिवाहप्रभृतिइत्यर्थः॥आश्वलायनोपि॥अतऊर्ध्वमक्षारालवणा

शिनौब्रह्मचारिणौअधःशायिनौस्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंवैकऋषिर्जायतइतिचरितव्र
तःसूर्याविदेवधूवस्त्रंदद्यादिति॥व्रतानंतरंसूर्याविदेवध्वाउपयमनकालेपरिहितंवस्त्रंअपरिहि
तंवस्त्रंदद्यादितिवृत्तिविद्भिःश्रीमत्प्रयोगरत्नकारैरपि॥अथविवाहोत्तरंदंपत्योर्गृहप्रवेशादिनादार
भ्योपक्रम्यततःशुभेह्निस्वस्त्यादिवाचयित्वास्वलंकृतःस्वलंकृतांवधूमुपगच्छेन्नरात्रौ॥वित्युक्तंधर्मप्र
वृत्तौ॥नारायणः॥षड्ऋतुभार्यांतत्रयंगादिकंचरेत्॥अनर्तुमतीभार्यायस्तसंगामितिकेचनेतिकेच
नेत्यूह्यं॥नगंतव्यमितिनिषेधाभावःसूचितः॥कारिकायामपि॥स्वस्त्यादिवाचयित्वादौस्त्रियंतामुप
गच्छति॥मुहूर्तेशोभनेतस्याःक्रीडनंस्याद्यथातथेति॥शातानेयंकारिकाज्ञातृभिः॥व्रतसमाप्त्यनंत
रंमुहूर्तेब्राह्मणैःस्वस्त्यादिवाचयित्वानक्तमेववधूमुपगच्छति॥स्पर्शादिसंकरीकरोतियथामनम
होरणतस्याःललाटंचरेत॥सुंदरवचनैरपेक्षितालंकारवस्त्रादिदानैःप्रीतिमुत्पाद्यलज्जामप

सं· कौ·
४२

प्रतीयपरस्पराधिमतंविषययोगमनुसरतिइति॥ विवाहप्रकरणेकात्यायनः॥ त्रिरात्रमक्षारालवणाशि
नौस्यातां॥ अथगर्भाधानहोमः। परिशिष्टे। अथर्तुमत्याः प्राजापत्यमृतौप्रथमेनुकूलेहनिसुस्नातयान्वा
रब्धप्राजापत्यस्यस्थालीपाकस्यकृत्वेताआज्याहुतीर्जुहुयात्॥ विष्णुर्योनिमितितिसृभिःनेजमेषेति
तिसृभिः प्रजापतेनत्वदित्येकामिति। प्रथमग्रहणाद्द्वितीयादावृत्तौनेतत्सूर्योपस्थानांतं॥ अनुकूलग्रह
णादुपगमनमत्राहोरात्रेचिकीर्षितं तद्दिनएवैतदितिनियम्यते॥ अतएवदिनांतरापेक्षयाचतुर्थस्यै
वानुकूलत्वेनत्रैवतत्। शांतिरपितदुपयोगितयातत्रैवयद्यपिशुद्धाभर्तुश्चतुर्थेह्निस्नानेनस्त्रीरज
स्वला। दैवेकर्मणिपित्र्येचपंचमेहनीशुध्यतीतिमदनपारिजातोदाहृतवचनात्॥ चतुर्थेह्निदैवक
मार्हतानेतिप्रतीयते॥ तथापितेनैवरजस्युपरतेसाध्वीस्नानेनस्त्रीरजस्वलेतिमनुवाक्यसाध्वी
गर्भाधानादिविहितकर्मयोग्येतिव्याख्यानात्। प्रधानानुरोधेनतदधिकारसंपत्त्यर्थं शांता

वप्यधिकारसिद्धेः॥ तथाश्रौतेषुदर्शादिष्वपित्रिरात्राणीतिवचनाद्रजस्वलायाःस्नानदिवसेपिश्रौतक
र्मणिकर्तव्यान्येवनतुपंचमेहनीतिआपस्तंबभाष्यकारोक्तेः॥ एवमुदाहृतमदनपारिजातग्रंथेआदिप
दंउपनयनाद्यभिप्रायंतत्रापिवक्ष्यमाणश्रीसूक्तहोमपूर्वकाभिषेकेणचतुर्थेहनिअधिकारसंभवात्
अन्यदिनानुकूलत्वेशांतिपूर्वकमतन्त्रैवेतिव्यवस्थावोध्या। अयंहोमश्चानाअनाहिताग्नेरर्धाधानिन
श्चाहिताग्नेःसत्यौपासनेतत्रैवकार्यः॥ तन्नाशेसतिद्वादशरात्रात्पूर्वंस्थंडिलाद्यग्निप्रतिष्ठापनांतं
कृत्वाऽयाश्चेत्याहुत्याद्योत्याग्निंतत्रकार्यः॥ तदूर्ध्वंप्रमादाग्नित्यागेप्रत्यब्दंप्राजापत्यः॥ एतावदब्दपर्यं
तंगृह्याग्निविच्छेदजनितदोषपरिहारद्वारापरमेश्वरप्रीत्यर्थं। एतावतः कृच्छ्रानेतत्प्रत्याम्नायद्वा
राचरिष्यइतिसंकल्प्यतथैवाचरेत्। ततएतावद्दिनेषुगृह्याग्निविच्छेदवशेनलुप्तसायंप्रातरौ
पासनहोमादिनित्यकर्मपर्याप्तंहोम्यद्रव्यंतन्निष्क्रयंवादास्येउत्सृज्यइतिसंकल्प्यपूर्वकं दत्वा

पुनःसंधानंकुर्यात्॥तद्यथा॥देशकालकीर्तनांते श्रीपरमेश्वरप्रीत्यर्थं विच्छिन्नस्यगृह्याग्नेःपुनःसंधा
नंकरिष्यतिद्गुतिसंकल्याग्निप्रतिष्ठापनांतंकृत्वाग्निध्यानांतेन्वाधानंकुर्यात्॥अस्मिन्नग्नाहि
तेग्नावाघारदेवतेआज्येनेत्यंतेअत्रप्रधानंत्रिरग्निंपवमानंअग्निंप्रजापतिंचाज्येनअर्यमणम
ग्निंवरुणमग्निंपूषणमग्निंप्रजापतिंचलाजद्रव्येणचतुर्वारंसूर्यांसावित्रींशेषेणस्विष्टकृतमि
त्यादि।पात्रासादनेप्रोक्षण्यादिषष्ठांपत्न्यंजलेःप्राक्स्रुवस्यासादनंसूर्पस्यच।सर्वेषांप्रोक्षणांते
आज्यसंस्कारः।तेनसहलाजानांत्रिःपर्यग्निकरणंआज्यस्योत्पवनमात्रेलाजानांत्रिःप्रोक्षणं
स्रुवांजलिशूर्पसंमार्गांतेलाजानामाज्यस्यदक्षिणतोबर्हिष्यासादनं॥आघारांतेअग्नआयूंषी
तितिसृणांप्रांतंवैखानसाऋषयःअग्निःपवमानोदेवतागायत्रीछंदःपुनःसंधानप्रधानाज्य
होमेवि०तिसृभिर्हुत्वाग्नयेपवमानायेदमित्यागः॥त्वमर्यमाभवस्कन्नकृतोग्निस्त्रिष्टुप्त्वमर्यमा·

अग्नयइदं·प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्प्रजापते·प्रजापतयइदं·ततःक्षालितेंजलौ
स्रुवेणोपस्तीर्यस्वयमेवलाजानांद्विरवदायजामदग्न्यश्चेत्त्रिरवदायशूर्पकोणस्रुवेनशूर्पस्यानवत्तां
श्चाभिघार्यस्वयमुपतिष्ठएवंतिष्ठंत्याअंजलिंनदक्षिणेनपाणिनाधृत्वास्वाहाकारांतेंजल्यग्रेण
जुहुयात्॥प्रजापतिंमनसाध्यायन्तूष्णीं॥होमेतिसर्वत्रेतिश्रौतसूत्रंपत्रतूष्णीं।शब्दविशिष्टहोमा
श्चापतेलत्रप्रजापतिंदेवतांध्यायेत्॥देवतासाध्यत्वाद्धोमस्य॥ध्यानत्वादेवमानसेसिद्धमनोग्रहणं।
शब्दध्यानांतेलेनचतुर्थ्यंतंप्रजापतिशब्दंध्यात्वातदनंतरंस्वाहेत्यपांसंकृत्वाजुहुयात्॥होमेधिति
बहुवचनादेवप्रकरणादुत्कर्षेसिद्धसर्वत्रग्रहणं॥गार्ह्येष्वपिअस्यप्राप्त्यर्थमितितिवृत्तिः।ततअर्यमणं
वरुणंपूषणमितितिसृणां।हिरण्यगर्भोर्यमाग्निर्वरुणोग्निःपूषाग्निस्त्रिष्टुप्पुनःसंधानप्रधान
लाजहोमे०॥अर्यमणंतु·अग्नयइदं·वरुणंतुवरुणायाग्नयइदं·पूषणंतु·पूष्णेअग्नयइदपत्न्या

न्वारब्धः शूर्पकोणे प्रजापतिमिति च तस्तृणां सूर्यासावित्री ऋषिः सूर्यासावित्री सविः सूर्यासावित्री देवता॥
अनुष्टुप्छंदः हृदयांजने विः स्वस्य पत्न्याश्च हृदयांजनं कृत्वा हस्तं प्रक्षाल्य स्विष्टकृदादि होमशेषं समाप्य दश
त्रीवौन्ब्राह्मणान्भोजयेत्॥ ॥इत्यनंतदेवीये संस्कारकौस्तुभे विच्छिन्नगृह्याग्निपुनःसंधानं सर्वाधानि
नापि एवमेव पुनःसंधाने नोपासनमुक्त्वा च गर्भाधानपुंसवनादिहोमः कार्यः तत्र कृच्छ्रसंकल्पो द्रव्यदानसं
कल्पश्च न कार्यः गर्भाधानहोमकर्तुं गृह्यपुनःसंधानं करिष्य इत्येव संकल्पः॥ गर्भाधानांतत्यागः॥ अर्धाधानि
नोपि औपासनहोमाद्यकरणपक्षे प्रायश्चित्तमात्रं न द्रव्यदानं॥ अथ प्रयोगः॥ ॥ कृतप्रातरभ्यंगस्नानं
कृत्वा शांत्यभावे सप्तमृत्तिकापंचपल्लवपंचत्वक्सहितैर्नूतनोदककुंभैः पत्नीमपि स्नापयित्वा तया
सहोपविश्य देशकालौ संकीर्त्य ममास्यां भार्यायां संस्कारातिशयद्वारा स्यां जनिष्यमाणसर्वगर्भाणां
बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म करिष्य इति संकल्प्य तदं

गत्वेन गणेशपूजनादि नांदीश्राद्धांतं कुर्यात्॥ तत्र तावत्पूर्वोपयोगित्वेन स्वस्तिवाचनमुच्यते तद्विधिमाह शौन
कः॥ स्वस्तिवाचनमेतत्तु सर्वेषामृद्धिकारकं॥ आद्यंते च कर्तव्यमिति यज्ञविदां मतमिति तत्र कलशस्थापनं
हारीतेनोक्तं॥ गोमयेनोपलिप्यावनिं रंगवल्लिकयार्चयेत्॥ प्रस्थधान्योपरिस्थाप्य पूर्णं हि कलशद्वयं॥ दक्षिणे
चोत्तरस्यां च उत्तरे तु निधापयेत्॥ पात्रमक्षतपूर्णं तु फलपुष्पसमन्वितमिति कलशं च कलशस्य तत्र निक्षेप्यपं
चरत्नानां च लक्षणं विष्णुधर्मोत्तरे॥ हेमराजतताम्रा वा मृन्मया लक्षणान्विताः॥ सुवर्णं रजतं मुक्ता राजा
वर्तः प्रवालकं॥ पंचरत्नमिति ख्यातमिति॥ कलशे निक्षिप्य पंचत्वचः पंचपल्लवाश्च तत्रैवोक्ताः॥ न्यग्रोधपिप्प
लप्लक्षजंबूतकुद्भवाः॥ कुर्वंति सीमद्भल्यू च घटे पंचत्वचः क्षिपेत्॥ अश्वत्थोदुंबरप्लक्षन्यग्रोधश्चूत एव
च॥ पंचपल्लवमाख्यातं सर्वकर्मसु शोभनमिति॥ अथ प्रयोगः॥ सपत्नीको यजमानः कृताभ्यंगः प
वित्रपाणिर्गोमयेनोपलिप्त रंगवल्लिकाद्युपशोभितभूतलस्य प्रस्थपरिमितधान्योपरि कलशद्वयं सकलस

सं० भ० पंमृदुजलपूरितंसपल्लवंनिधायतत्पश्चिमदेशेयुग्मान्ब्राह्मणान्विशुद्धान्प्राङ्मुखांदक्षिणतोवाउद
५५ ङ्मुखानुपवेश्यसोत्तरवदेशुद्धपीठेस्वयमुपविश्यस्वदक्षिणेसंस्कार्यमुपवेश्यप्राणानायम्ययथाचारमि
ष्टदेवतादिनमस्कारपूर्वकंसुमुखश्चेत्यादिपठित्वादेशकालौसंकीर्त्यअमुककर्मकरिष्ये तदंगत्वेनस्वस्ति
पुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये।।तदादौनिर्विघ्नतासिध्यर्थंगणपतिपूजनंकरिष्य इ
तिसंकल्प्यगणानांत्वा।।ऋद्धिबुद्धिसहितंगणपतिंगणपतिमावाहयामिगणपतयेनमः।।आसनं।पाद्यम
र्घ्यमाचमनीयमित्यादिदक्षिणांतंकृत्वा निषसीदेतिमंत्रेणपुष्पांजलिंसमर्प्य वक्रतुंडेतिसंप्रार्थ्यस्व
पुरतःमहीद्यौःपृथिवीचनइतिमंत्रावृत्त्यादक्षिणतउत्तरतश्चभूमिंस्पृशेत्।।एवमुत्तरक्रियाणांतत्तत्का
लानुस्मानेमंत्रावृत्तिः पूर्वस्थापितकलशयोःसं मंत्रेणमंत्रप्रयोगः।।ओषधयःसमितितिमेवतंडुलपुं
जीकृत्वाआकलशेष्वितितंडुलपुंजोपरिकलशौनिधायइमंमेगंगेइतितीर्थजलेनप्रत्येकंपूरयि

त्वागंधद्वारामितिगंधंप्रक्षिप्यओषधयःसमितिसर्वौषधीः।काण्डात्काण्डादितिदूर्वाः।।अश्वत्थेवोनिषदनमि
तिपंचपल्लवान् रुवतिभीमहइतिपंचत्वचः।स्योनापृथिवीइतिसप्तमृदः।याःफलिनीरितिदूर्वाफलं।सहिर
त्नानीतिपंचरत्नानि।।हिरण्यरूपइतिहिरण्यं।।युवासुवासाइतिवाससासंवेष्ट्य पूर्णादर्वीतिपूर्णपात्रंस्थाप्य
तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्पूज० तत्वायामीतिमंत्रकलशेवरुणंगंधादिभिःपूजयित्वातत्रकलशे
कलशस्यमुखेमुखःकंठेरुद्रःसमाश्रितः।। मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः।कुक्षौतुसागराः
सप्तसप्तद्वीपावसुंधरा।।ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः।।अंगैश्चसहिताःसर्वेकलशंतुसमा
श्रिताः।।अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा।।आयांतुममशांत्यर्थंदुरितक्षयकारकाः।।सर्वेसमु
द्राःसरितस्तीर्थानिजलदानदाः।।आयांतुमम० ततःकलशेविष्ण्वादीन्संपूज्यअक्षताःक्षिपेत्।।मा
तृदेवोभव।पितृदे० आचार्यदे० अतिथिदेवो० आशिषःप्रार्थयंते एताःसत्याआशिषःसंतु।अवनि

 कृतजानुमंडलः कमलमुकुलशिरस्याधायासदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनास्कवर्णपूर्णकल
 शंधारायित्वादीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु।शि
वाआपःसंतु सौमनस्य· अक्षतंचारिष्टंचास्तु गंधाःपांतु सुमंगल्यं· अक्षताः॰आयुष्यम·पुष्पाणिपांतु
सौमनस्य· तांबूलानिपांतु।ऐश्वर्यमस्तु दक्षिणाःपांतु बहुदेयंचा· अत्र गंधाःपांत्वित्यादिभिमंत्रपूर्वीर्द्वैः
युग्मान्ब्राह्मणान्गंधादिनापूजयेत्॥ तेचसुमंगल्यंचास्त्वित्यादिमंत्रोत्तराद्धानिप्रतिब्रूयुः।यंकृ
त्वासर्ववेदयज्ञकर्मारंभाः शुभाः शोभनाः प्रवर्तंते॥ तमहमोंकारमादिंकृत्वाऋग्यजुः सामाशीर्वचनं
बहुऋषिसंमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये इत्युक्त्वावाच्यतामितिप्रब्रूयुः।भद्रंक
र्णेभिःकृ द्रविणोदाःकृ सवितापश्चात्तात्कृ नवोनवोःकृ आपउदंतुजीवसे ॰यस्त्वा॰ जातवेदो॰
यस्मैत्वं· अश्विनंस· संत्वासिंचामि॰ धनंच॥ व्रतनियमः स्वाध्याय॰ मनः समाधीयतां।समाहित

मनसःस्मः प्रसीदंतुभवंतः प्रसन्नाःस्मः शांतिरस्तु पुष्टिरस्तु तुष्टि· वृद्धि· अविघ्नम·आयुष्यम·आरो
ग्यम·शिवंकर्मा·कर्मसमृद्धि· वेदसमृद्धि· शास्त्रसमृद्धि· धनधान्यसमृद्धिर· इष्टसंपदस्तु अरिष्टनिरस
नमस्तु यत्पापंतत्प्रतिहतमस्तु· यच्छ्रेयस्तद· उत्तरेकर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धि·उत्तरो
त्तराः शुभाः शोभनाःसंपद्यतां तिथिकरणमुहूर्तनक्षत्रसंपदस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्ना
धिदेवताःप्रीय॰ तिथिकरणेमुहूर्तेनक्षत्रेसग्रहेसदैवतेप्री॰ दुर्गापांचाल्यो॰ अग्निपुरोगाविश्वेदेवाः
प्री·इंद्रपुरोगामरुद्गणाःप्री· ब्रह्मपुरोगाःसर्वेदेवाःप्रीयतां माहेश्वरीपुरोगाउमामातरःप्री·वसिष्ठ
पुरोगाऋषिगणाःप्री॰ अरुंधतीपुरोगाएकपत्न्यःप्रीयंतां ऋषयःछंदास्याचार्यादेवावेदायज्ञाश्च
प्रीयतां॥ श्रीसरस्वत्योप्री·श्रद्धामेधप्री· भगवतीकात्यायनीप्री· भगवतीमाहेश्वरीप्री·भगवतीतुष्टि
करीप्री·भगवतीपुष्टिकरी·भगवतीवृद्धिकरीप्री· भगवतीऋद्धिकरी·भगवंतोविघ्नविनाशकोप्री·

भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगताः प्री॰ हरिहरहिरण्यगर्भाः॰ स
र्वाश्च ग्रामदेवताः प्री॰ सर्वाः कुल॰ सर्वा इष्टदेवताः प्री॰ हता ब्रह्मद्विषः हताः परिपंथिनः। हता अस्य कर्म
णो विघ्नकर्तारः शत्रवः पराभवं यांतु। शाम्यंतु घोराणि। शाम्यंतु पापानि शाम्यंत्वीतयः शुभानि वर्धंतां
शिवा आपः संतु ऋ॰ शिवा ऋतवः संतु शिवा अतिथयः॰ शिवा ओषधयः॰ शिवा वनस्पतयः॰ शिवा अ
ग्नयः॰ शिवा आकृतयः॰ अहोरात्रे शिवे स्यातां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः
पच्यंतां योगक्षेमो नः कल्पतां शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरो
गाः॰ सर्वे ग्रहाः प्री॰ भगवन्नारायणः प्री॰ भगवान्पर्जन्यः प्री॰ भगवन्स्वामी महासेनः प्री॰ पुण्याहकाला
न्वाचयिष्ये वाच्यतां। उक्षातेवद्गा॰ पुण्यमावद। याज्यया यजति संस्कुरुते॥ यत्पुण्यं नक्षत्रं॰ पुण्याह
एव कुरुते॥ मह्यं सहकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय अस्य अमुक

कर्मणः पुण्याहं भवंतो ब्रुवंतु ॐ पुण्याहं त्रिः। स्वस्तये वायुमुपब्रवाम॰ तु नः। आदित्य उदनीयः स्वस्त
धंति। स्वस्ति न इंद्रो॰ दधातु॥ अष्टौ देवाः स्वस्ति॥ मह्यं सह॰ अमुककर्मणे स्वस्ति॰। असौ कर्मणे स्वस्ति इ
ति प्रतिवचनं त्रिः॰ ऋध्याम स्तोमं॰ कामम्प्राः सर्वाम्ऋद्धिं॰ य एवं वेद॰ ऋध्यास्म हव्यैर्नमः॰ सदीराः॥
।त्रीणि त्रीणि वै देवानां॰ प्रतितिष्ठति मह्यमित्याद्यस्य कर्मणः ऋद्धिं भवं॰ त्रिः। विप्रामिति ऋध्यतां त्रिः
ॐ श्रियेजातः॰ य एवं वेद। यस्मिन्ब्रह्माभ्यजयत्सर्व॰ मानं अहे बुध्निय॰ सत्तां। एतैर्मंत्रैर्नीराजनं कार
येत् मह्यमित्यादि पूर्ववत् अमुककर्मणः श्रीरस्त्विति भवंतो ब्रुवंत्विति त्रिः॰ अस्तु श्रीरिति प्रतिवचनं त्रिः
वर्षशतं पूर्णमस्तु शिवं शिवम॰ गोत्राभि॰ प्रजापतिः प्री॰ शुक्रेभिरंगैरज आततन्वान् क्रतुं दधेय॰ सभासदद
ति ततउत्तरकलशं दक्षिणहस्ते दक्षिणकलशं वामहस्ते गृहीत्वा ताभ्यां धारा दुग्धसंततं पात्रे निषिं
देभिर्मंत्रैः वास्तोष्पते॰ ध्रुवे। वास्तोष्पते प्र॰ जपस्व। वास्तोष्पते॰ शग्मया॰ संसदा॰ अमीवहा वास्तो॰

 एधिनः। शिवं ३ ततः पत्नी वामतः उपवेश्य तदुक्तं॥ सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता॥ विप्रपादक्षा
 लने तु अभिषेके च वामतइति ब्राह्मणा अभिषेकं कुर्युः समुद्रज्येष्ठा॰ मवंतु॥ या आपो॰ नंतु॥ यासां रा
जा॰ वंतु॥ यासु राजा॰ वंतु॥ त्रायंतामिह देवा॰ असत्।आपइद्वा उभेषजी।हस्ताभ्यां॰ स्पृशामसि॥ इमा
आपः॰ मृतोमृताः॥ याक्षिरिं॰ राजो भवेह॥ महातंत्वाम॰ अनंत देवस्यत्वा॰ यशसे न्नाद्याय॥ भूर्भुव॰
नं छंयो मंत्रांते अमृताभिषेकोस्त्विति वदेयुः॥ ॥इति स्वस्तिवाचनं॥ अथ शौनकाद्युक्तं शौनकः॥ अर्चि
ताब्राह्मणाः सम्यग्गंधमाल्यैः सदक्षिणैः॥ तिष्ठेयुः प्राङ्मुखा युक्तावक्ता शेषदर्भपाणयः॥ तिष्ठद्वाचयि
ता तेषां दक्षिणस्यामुदङ्मुखः॥ विष्णुत्पूर्णमपां पूर्णां पिहितानन मर्चितां॥ अथ वाचयितुर्वाऽद्रदक्षिणां
तु समाश्रितां॥ तिष्ठंत्युदङ्मुखाः सम्यक्संस्कार्यास्तत्र तत्र तु॥ मनइत्यादिकं मंत्रं पूर्वं वाचयिता व
देत्।समाहितेत्यादीतरे मंत्रं ब्रूयुः समाहिताः। प्रसीदंतु भवंतु इत्यथार्थित्वांवोने वदेत्॥ प्रसन्नाः स्मइति

ब्रूयुर्वाचिता ब्राह्मणाः पुनः॥ शांतिपुष्ट्यृद्ध्यविघ्नाद्याः शब्दाः पंचदशैव तु॥ अस्त्विति शब्दांतमुच्चेरन्वाचयित्वात
थापरैः॥ आशीर्वादानथान्यांश्च विविधानपि वाचयेत्॥ अतो देवा अवंतु नः सत्यं वै ब्रध्नमुन्नसं॥ द्रविणो
दाः सवितेति नवा विद्युन्नवेति च॥ आवदंस्त्वमित्युक्त्वा पुण्याहं वाचयेत्ततः॥ वाचयित्वायथाशक्ति सर्वाणि
द्विजसत्तमैः॥ प्रस्तुतदेवतायास्तु होमं कुर्याद्विचक्षणः॥ तस्या नाम गृहीत्वाथ प्रीयतामिति चोच्यतां॥
पुण्याहं स्वस्ति मृद्धिं च भवन्तूर्वं ब्रुवंत्विति॥ प्रणवादित्रिराचष्ट भवद्भ्यो दिनापरे॥ पुण्याहादस्त्रिरभ्या
सेमंद्रमध्योत्तमस्वनं॥ आश्रयेरन्निमे सर्वं यथागमपरंपरं॥ प्रयुक्तिविषये भेदस्तत्नीयेत्वृच्यतामिति॥ व
क्तारो ब्रूहिरत्युच्चैरत्तिविस्पष्टमेव च॥ पुण्याह शब्द मुक्त्वा तु स्वस्तिनइत्यृचं जपेत्।स्वस्ति शब्दं तथोक्त्वा चं ऋ
ध्यामेच ऋचं वदेत्॥ ऋद्धिं भवंतो ब्रुवंत्वित्यृध्यतामित्यथो वदेत्॥ आपोहिष्ठेतु तिसृभिः शन्नोदेवी
त्यचैकया॥ ईशना वार्याणां पं च शुद्ध वत्यघमर्षणं॥ तरत्समंदी सूक्तं तु सर्वपापपनोदनं॥ पवस्व सोम

मित्यादिभिरद्भिःप्रोक्ष्यसमंततः॥पुण्याहंवाचयित्वैवंसर्वंकल्याणवान्भवेत्॥स्वस्तिवाचनमेवंतुसर्वे
षामृद्धिकर्मणां॥आद्यंतेचकर्तव्यमितियज्ञविदांमतमिति॥जयंतेनकारिकाकारेणाग्निनाद्युत्वा
रभ्यततथापरैरित्यंतग्रंथमित्यमेवपठित्वाप्रस्तुतदेवतायाद्युत्वारभ्यततीयेत्वृध्यतामितीत्यंतंप
ठित्वाततआपहूत्यादिभिःशांतिंततःकुर्युःसमाहितादुनिपठित्वांत्यःश्लोकःपूर्ववदुक्तः॥परिशिष्टे
अथसर्वेसंहत्यशांतिःपुष्टिस्तुष्टिर्वृद्धिरविघ्नमायुष्यमारोग्यंस्वस्तिशिवंकर्मसिद्धिर्धर्मसमृद्धिःपु
त्रसमृद्धिर्वेदसमृद्धिःशास्त्रसमृद्धिर्धनधान्यसमृद्धिरिष्टसंपत्त्येतानिपंचदशांस्त्वेतानिवाक्यान्यु
क्त्वातन्नाम्नाकर्मदेवताप्रीयतामितिब्रूयुः॥अथवावाचयितापूर्वंतत्तल्लिंगान्मंत्रान्पठित्वाचिरिरंमं
द्रमंद्रमध्यमोच्चस्वरैःॐपुण्याहंभवंतोब्रुवंत्वितिस्वस्तिभवंतोब्रुवंत्वित्यृद्धिंभवंतोब्रुवंत्विति
ब्रूयात्।तेपितथाप्रत्येकंप्रतिब्रूयुःॐपृध्यतामित्यृद्धौब्रूयुः॥अथप्राङ्मुखमासीनंसामात्यं

कर्तारंब्राह्मणाःसपल्लवदर्भपाणयःशांतिपवित्रलिंगाभिरद्भिःसिंचेयुः।पुरंध्रयोनीराजना
दिमंगलेकुर्युरिति।कर्मदेवताआहबौधायनः।विवाहाग्नेरौपासनस्याग्निसूर्यप्रजापतयःस्था
लीपाकस्याग्निर्गर्भाधानस्यब्रह्मा।पुंसवनस्यप्रजापतिःसीमंतस्यधाता।विष्णुर्बलेःसविताजात
कर्मणोमृत्युर्नामकर्मणःसविता।तस्यांतेप्रजापतिरुपनिष्क्रमणस्यसविता।तस्यांतेचित्रिया।पि
अन्नप्राशनस्यसविताचौलस्यकेशिनस्तस्यांतेप्रजापतिरुपनयनस्येंद्रःश्रद्धामेधेअंतेविसर्गे
सुश्रुवाःपुनरुपनयनस्याग्निः।अथयदिब्रह्मचर्यव्रतमाचरेत्तस्मिन्नपापहोमेसवितासमावर्तन
स्यश्रीः।इंद्रोवा।शूलगवस्येशानःप्रत्यवरोहणस्यसवितोपाकर्मणिव्रतेषुसवितावास्तुहोमस्य
वास्तोष्पतिरंतेप्रजापतिः॥आकृतहोमस्येंद्राग्नेप्रजापतिरायुष्यहोमस्याग्निरायुष्मान्।
नक्षत्रहोमस्यनक्षत्रेषूक्तं।अष्टमीप्रदोषस्येशानःआग्रयणस्याग्रयणदेवताः।सर्पबलेः